चित् कालवाचित्वेन ग्रहणं। घुघुलसूत्रे चिरमित्यस्य ग्रहणेनाव्ययत्वमयुक्तं घुघुलोरनित्यत्वाज्ञापकप्रयोगादेव वा न
त्वप्रवृत्तिः। कुकविकृतिरिति। कुत्सितस्य कवेः कृतिरित्यर्थः। इहगोणशब्देनात्र लाक्षणिकमात्रमित्यभिमानः। व
स्तुतस्तद्व्यतिरेकेणैतत्वं। लक्षितलक्षणयेति पुष्यपदलक्षितचंद्रमसा कालो लक्ष्यत इत्यर्थः। परं परासंबंधेनपु
ष्यपदस्य काले लक्षणे सर्थो वा मुख्योर्थ इति। शक्योर्थ इत्यर्थः। तस्यादित्ताभावादिति। मत्यपसन्नियोगशिष्टत्वा

११०

ऽनरंगत्वानुदि अंगास्य रस्येत्यर्थे न तष्ठस्य परत्वाभावेत्कर्मठ इत्यादौ अठच्छस्येवेकादेशो दुर्लभः यदागमा इति न्याये न विशिष्टस्य ग्रहणेपि निर्दिश्यमानपरिभाषया समुदायस्य नस्यात्। निर्दिश्यमानस्तु व्यवहितन इति भावः। मत्स्यया युदात्तत्वे कृत इति। सं[illegible]नियोगशिष्टत्वेनेति भावः। अत्र ठच्छित्वे नेत्युपलक्षणं। युच्छित्वं समान्यापेक्षं ज्ञापकं। प्रत्ययसंबंध्यादेशा अनरंगेभ्योवलवंत इत्यानि बोध्यं। ठच्छित्वं तु न ज्ञापकं ठस्येक इत्यत्र संघातग्रहणपक्षेनोदात्तस्य ठस्यांतरतम्यादंनोदात्तादेशसंपादनेन चित्वसार्थक्यात् वर्णग्रहणपक्षे ठकारादि घकार उच्चारणार्थो न च्छा एव मत्स्यया इत्यर्थस्याकरसंमतत्वेन मत्स्यये अर्थस्य चित्वस्यादेशेनोदात्तप्रहस्यासार्थक्यात्। भाष्ये तु श्वसस्तुट् चेति चेनादेशसंनियोगः कर्तव्य इत्युक्तं। यदि तु अंगत्वनिमित्तस्येति व्याख्यायनेयदागमा इति परिभा

षष्ठाविशिष्टस्य ग्रहणे विनिर्दिश्यमानपरिभाषया ष्ठस्यैवादेशः इत्युच्यते न तु हस्वस्येति निष्कर्षः। अपकृष्यत इति। सर्वत्र

ग्रहणसामर्थ्यात्। अन्यथा छंदसीत्यस्य निहस्यैव नत्फले सिद्धे तदुपयोगस्य षष्ठमेवेति भावः। न चाहेमन्तो लोके हृति

नि॰ ३ विषये एव अनुवाचित्वमिहेमन्तशब्दे नैव ग्रहइति वाच्यं। वैकल्पिकत्वादिति। एवं च रूपत्रयसिद्धाविदं नकार्य

मिति भाष्ये उक्तं। त्वद्रीत्याहेमन्तशब्दे ऋत्वणो हेमन्तान्चेति अवाधापत्तौ हैमन्तमित्यसिध्याफलभेदमस्यानास्त्याना

संभव इति भावः। सर्वत्रग्रहणं तु सर्वं चविषाणौ रेति वदिति नार्थसाधकं। न च हेमन्तान्चेति चेन ऋत्वणो नुकर्षणा

त्सिद्धिः। वसन्तान्चेति च वदस्यापि छंदसीत्यनुकर्षकतायाएवौचित्यात्। अंगसंज्ञानिमित्त इति। स्युशब्दस्य प्रत्य

यत्वात् तदवयवो यो युशब्दस्तस्य विधीयमानोंगरूपसंज्ञिनिमित्तको ऽनादेशो न स्यादित्यन्वयः संज्ञायत इति संज्ञा

अ० २०

कर्मण्यपु॰ अंगरूपसंज्ञीत्यक्षरार्थः। अंगात्परस्ययोरित्यर्थे दोषः। यद्यागमा इति न्यायेनागमविशिष्टस्ययोग्रहणे
विनिर्दिश्यमानस्यव्यवहितत्वाद्विशिष्टस्यानिर्दिश्यमानत्वाच्चाप्राप्तिरिति भावः। अंगसंज्ञानिमित्तमितित्यपपाठः
।तादर्थ्ये हि उक्तरीत्या दोषस्याभावात्। कालवाचित्वाभावादिति। अवसानवाचित्वादिति भावः। आहुरित्यत्राह चि
वीजेस्यमेवाह। यद्यपीति। अनभिधानादिति। सायान्हसायन्तरयोः सायेऽइति सक्षेत्र एव च तस्य प्रयोगो नान्यत्रे
त्यर्थस्य भाष्ये स्पष्टत्वादिति भावः एवं च सायमेऽनेत्यादिचिंत्यमेवा। अप्रबुना विति। अचेत्यस्याप्युपलक्षणं। हसंपा
ठोपि समर्थयितुमिति। न च यवंनानुकरणेऽनरंगत्वाद्वृद्धौ वृद्धिमत्कृतिभूतमनुकर्तुमशक्यमिति वाच्यं। अभावस्य
दिति सत्रेपक्षे वृध्यभावएवनिपातस्यतदृत्याश्रयात्। सोवातइतीति। स्वातेरुभयथा प्रोक्तिरित्युपक्रम्य हि तदुक्तं भाष्ये

१२

।माधवस्त्विति।अत्राहुश्चिंत्यं तु वृद्धविरोधः।हरदत्त इति।अत्राहुश्चिंत्यं तु नपुंसकह्रस्वविशिष्टस्य लिंगप्रत्ययेवेशि
ष्टासंभवेन परिभाषाप्रवृत्तेर्दुरुपपादत्वं।तस्मात्स्त्रैसमाहारद्वंद्वगर्भो द्वंद्वः।तेन स्त्रीलिंगयोर्ग्रहणं।नपुंसकह्रस्वत्वेप्ये
कदेशविकृतन्यायेन लुगिति तत्वं।श्रीतत्वप्रकाशिकेति।शेषइत्यनेनास्यापि सिद्धेः पूर्वस्य स्पष्टतार्थमित्युक्तं।स्पष्टतयेन
दर्थलाभार्थमिति तदर्थः।जातलब्धाभ्यामन्यथासिद्धिस्त्विह परित्यक्तेति न विरोधः।तद्देवाह।अन्तरएवेति।विशिष्टेति।
काद्यविलंबाभावप्रतियोगित्वविशिष्टं भवनं प्राप्यभवशब्दार्थः।शुद्धं तु भवशब्दार्थ इति भावः।ऋज इति।कालाद्वञ इत्य
र्थः।समानार्थ इति।प्राधान्येन तु विचारः कर्तुसतयोरुभयत्रापि बोधादिति भावः।भिन्नार्थ इति।धनवाचीत्यर्थः।आ
त्तेयमिति।विद्यमाने धने चभवमित्यर्थ इति तदाशयः।अभ्यमाश इति।वरुचोंतोदात्तादित्यनेन।अनद्यतनु बंधकस्याग्रह

शा०१० णादिति। यद्यपि येनानुबंधेन सानुबंधकत्वं स्यादनुबंधकत्वं वा न तदनुच्चारणे एव न तस्य ह्रस्वेरत्र न तस्यावृत्तिः तददनुबंधकेति
शास्त्रमर्यादया न यैव लाभात्। सउच्चारितस्यैवानुबंधो यस्येति न दर्थात्। अनेनैव कभृ विधायके सूत्रे नित्वे न स्वरसिद्धे
×ति३ र्नित्वं रिदे हि निसूत्रे विशेषणार्थं। अन्यथा पाचिकैत्यत्रापि प्रसज्येते त्यपि गर्भे भाष्यं संगच्छते। सूत्रे च तंत्रेण ककारनकौभ ×रे३
यानुबंधोपलक्षितस्य न कारानुबंधोपलक्षितस्य च ग्रहणमिति न दोषः यस्तथाप्येतत्क्लेशपरिहारार्थमेव च ऊहनरतिर्चिंता
वीजमिसाशयः। पूर्ववत्करणस्येति। निष्क्रामत्सुरुषीय निष्क्रमणकर्तृत्वारोपात्करणस्य द्वारस्य कर्तृत्वं वोध्यं तत्र भवर
स्येवेतिं स्थित्यस्य र्थकभुंवोपितन्नग्रहणादिति भावः। प्रसुविवर्तत्वादिति। प्रसोपादानकारणकत्वादित्यर्थः। नरायणेति।
नराः अयनं स्थानं यस्येत्यर्थः। अंतर्यामितया तेषु स्थितेः अस्मादेव स्वार्थिके णि नारायणः। नरसमूहार्थकता

४ तित् २

रत्नाद्येनायं साधुरित्यन्ये। प्रकाशितमिति। प्रथमप्रकाशितमित्यर्थः। अयमेव प्रकर्षः तत्स्वकृतमन्यकृतं वा। अनन्तेन
कृतमित्यनेनानुगतार्थता। पंचेति। जितलितकित् निरनुबंधकभेदेन पंचेत्यर्थः। षट्।ठ।ण।णप्।अन्।अत्।तनः सूत्रोक्ताः पंच
महोत्सर्गाद्यर्थः। अनंतरादिति। संबंधिविशेषः। णिदयमिति। ननु जितः अन्यथेनः स्वार्थे अविधानं व्यर्थं स्यादि
तिभावः भाष्ये तु जित्यथनेत्स्वियां ङीबर्थं स्वार्थिकाः अश्वारितार्थं वक्तुं शक्यमिति भावः। अग्निमिंधे इति। इंधयतीत्यर्थः
। इतिलुगिति। यथा अलुक् तथा द्विगोरिति सूत्रे निरूपितं। बीजांतरमाह। अनखेति। एतत्सामर्थ्याद्देवहलादेरपि यतो लु
क् भवतीति भावः। बोद्धव्यानि। तस्य तस्य सामान्यविशेषसर्वप्रकृतिसंग्राहकत्वबहिर्दृष्टमित्यस्य सामान्यरूपेण विशेषरू
पेण च सर्वविशेषबोधकत्वं बहति बोढेति च समानार्थमिति भावः। स्यष्ठेचेदं तस्यापत्यं न दृहतीति सूत्रभाष्ययोः। स्त्रिया

ग्रा.२०

मिति।स्वभावादिति भावः।क्रियेति।विवाहरूपेत्यर्थः।तुग्न इति।गोत्रग्रहणानुवृत्त्या गोत्रप्रत्ययानामेवाग्नादीनां ग्रहणमित्य
र्थः।ऊर्ध्वमिति।गोत्रेऽलुगचीत्यलुकाद्वृद्धिसिद्धेरिति भावः।नन्वादिति।याज्ञिकाद्यस्येति बोध्यं।नेहेति।नेदं तुग्नविधिमा
त्रविषयं संकोचे मानाभावात्। ।इति शैषिकाः। ।तस्य ग्रहणस्य।तस्येदमित्यत्रत्यस्य।मयड्वैतयोर्भाष्यमिति।मय
ड्वैतयोरित्यधिकारे नित्यं वृध्येनीत्यर्थः।एतेन मयड्वैतयोरित्युपन्यासोऽसंगतः तस्य पाक्षिकत्वेनाणोपीष्टत्वादित्यपा
स्तं।अप्राणीति।अनुवर्णनमित्यपि बोध्यं।आपुदानमिति।अनुदात्तादिभिन्नमित्यर्थः।इदं।प्राणीत्यादि।वहुश्रुतेः
कार्यं इति।जितश्च तत्प्रत्ययादिति सूत्रभाष्यप्रामाण्यादिहैवेति लभ्यते।तत्र हि विकारविकारेऽपि तद्धिकारत्वमारोप्य तत्
त्प्रत्याख्यानम्।अन्यथापित्वान्ङीपूतत्प्रत्याख्याने।आरंभेतत्त्वं तत्वान्ङीविनिफलभेदेन हसंगतिः स्यादिति बोध्यं इदं।

भाषाग्रहणं। अचसवेति। विकारावयवयोश्चेच्छंदसि म॰यट् तर्हि अच एवेत्यर्थः ततश्चान्यत्रार्थे एवच्छंदसि वह्वचोमयडि
निभाकः विपरीतेनेति अचश्चेद्धिकारादौ मयड्वहिछंदस्येवेत्येवमित्यर्थः। तेन लोके ए॰ मयमित्यादिप्रयाहृतिः स्यादितिभा ×पि२
वः समासनिर्देशादिति। अभक्ष्येत्यादौ समासनिर्देशादेतयोरित्यत्र न द्वंद्वादेकशेषनिर्देशाच्चेत्यर्थः। एवं च तयोः ए
थगुपस्थित्यविषत्वान्न यथासंख्यमिति भावः। एतयोरित्यनेन विकारावयवयोः क्रमेणोपस्थितिरित्यर्थे मानाभावा
च्चा। एतेनापंनाविस्यादिवत्स्वर्थगनुपस्थितावपि न तस्यादित्यपास्तं। भाषायामितीति। भाषायां मयट् अचश्छंदसीसत्त्र
यनेत्यर्थः तस्यनिर्णायकत्वादिति। विज्ञानमयान्तरसमयाभ्यां माययाशाच्चेत्यपि बोध्यं। अवस्थितत्वादिति। एवं च वामी
×वा१ त्यनेन वैकल्पिकत्वरीत्या समानस्य नित्यार्थत्वमिति नृम्णमिति भावः। यथपि स्तुत्या मणीनामिति प्रयोगे समाहारद्वंद्व

शा०२०

पूर्वैकैकशेषेण सिद्धिमाश्रित्य स्त्रीमणीत्यंशोऽपि भाष्ये प्रत्याख्यातस्तथापि व्यवस्थितविभाषाश्रयणेन स्त्रीत्वंशस्यैव प्रत्या
ख्यानमित्याशयः। स्त्रोन्येति। व्यवस्थितविभाषयैव सिद्धेः। इत्यादीति। अन्नमयेत्यादिशब्दार्थः। विज्ञानमयेत्यन्तरस
मयस्याप्युपलक्षणं। प्रकृत्यर्थविरोधिन इति ब्राह्मण। अत्र प्रचुरा इत्युक्ते नियमेनान्येषामल्पत्वमनीतेरिति भावः। पर्यवस्य
तीति। तस्य पर्यवसानं कथमिति चिंत्यं। स्य इत्यादिति। एकाचो नित्यत्वेन नैव सिद्धेरिति भावः। आर्थिकार्थेति। योयतो निर्गतः
स तस्य विकार इति लोकप्रसिद्धेरिति भावः। इदमर्थे इति। अयं चासाधर्थश्चेदमर्थस्तत्र पुरीषरूपे इत्यर्थः। तस्य पुरीष
मित्यर्थे प्रत्यय इति यावत्। लिंगं विकारावयवत्वाभावरूपं। एतच्च कैयटहरदत्तानुरोधेनोक्तं। चिन्त्यमिति सूत्रस्य भा
ष्यानुगौ भुक्ताहारविकारे [illegible] गोविकारत्वमारोप्य प्रकरणबाधएवोक्त इति दिक्। मयटं बाधितुमिति। योगविभागसि

ढत्वेन कार्चित्कत्वादेकाचो नित्यमिति मयट्सु शाक वारण इत्यभिमानः। मयट्श्चेति। उभाभ्यामपि येन नाप्राप्तिसत्वा
दिति भावः। परशाव्यस्येति। यदंतत्वेन स्वरितोंतत्वादिति भावः। यत्तु पाक्षिकमयट् उभावार्थमिति तन्नोन्यथैवोपपत्तेः शास्त्र
बाधे मानाभावात्। ।इति प्राग्दीव्यतीयाः। ।प्रकृतिभागस्येति। तस्य च न द्दर्थे लक्षणेति भावः। स्थानिवत्वेन धातुत्वा
दिकानिर्देश इत्यन्ये। सोस्यैव मपंच इति। केचित्तु एतद्दलाऽकरणसूत्रमनार्षमित्याहुः। पक्षे शीर्षभार इति। सोपि गणे पठ्य
ते। एकदेशविकृतन्यायेन तु न सिद्धिः। शीर्षभारस्य विकाराभावात्। न्यायसिद्धेति छिन्नपुच्छश्वद्दष्टांत मूलकैकदेश
विकृतन्यायेनेत्यर्थः। यद्वा सर्वे सर्वपदादेशा इति न्यायेन विशिष्टस्यादेश इति स्थानिवद्भावन्यायसिद्धेत्यर्थः। ख्यातं
श्रेणेति। त्रिमत्स्य पांतान्मपूर्नित्यं भवत्येवेत्यर्थः। न द्दविवक्षायामिति। निर्देशेत्येर्थे त्रिमत्स्य पांतान्म भवत्येवेत्यर्थः। प्र

सू०२०

करणादिति भावः। योगं विभजस्वेति। त्रेर्मप्। त्रिप्रत्ययांतप्रकृतिकात्तनीयांतान्निर्वृत्तेर्थे मबित्यर्थः। ततो नित्यं नेदं मब्विधा
यकं। नित्यविकल्पयोर्व्यवस्थानापत्तेः। नापि निर्वृत्ते मपो नित्यत्वबोधकं। एकयोगेन सिद्धेः। किं तु निर्वृत्तार्थमनुवादेन

^वि३

नित्यत्वं धायकं नित्यत्वं वा योगव्यवच्छेदः। शंखो नित्यं पाण्डुर इतिवत्। न च हि न कदाप्यपांडुर इति प्रतीयते एवं च निर्वृ
त्तेयोयं म पृसत्यंनादृ वसेवन कदापि न भवतीत्यर्थः। ते न निर्वृत्तेपि वाक्यं न। अन्यत्रापि त्र्यंतस्य प्रयोगो न। तदाह।
अर्थविशेषानादरेणैवेति। अत एव त्र्यंतं मविषयमेव यथा स्यात्केवलस्य प्रयोगो माभूदिति भाष्ये संगच्छते तेन प
क्त्रिः क्रियते कृत्रिममहत्सुंदरमिति च न। एवं चाघसूत्रेपि वेत्यस्यासंबंधः फलाभावादिति बोध्यं। ततीयांतत्र्यंतादि

^क१

निर्वृत्तिस्तु अलौकिं विग्रहाभिप्रायेण। भावप्रत्ययांतादिति। निर्वृत्ते इति शेषः। नास्मात्तनीयांतादिति। तेनेत्यधिका

रेफीति भावः। वचनादिति। अपमित्यश इत्यस्य यो भवतीति वचनसामर्थ्यादित्यर्थः। ऊनत्वेनेति। अन्वीपि केत्यर्थः। अन
एवेति। प्रत्यये इति लोपेनैव सिद्धे निपातनं वैयर्थ्यापत्त्या नञ्सस्य पसन्नियोगेनैव निपातनमिति भावः। विशेषणत्वादेका
दशास्य पूर्वनिपातापत्तेराह। संख्याया इति। इदं च द्वंद्वसाधारणमिति न इत्यस्मिन्नधिकमिति सूत्रे कैयटे स्पष्टं। एतेन द्वंद्व
बहुव्रीहिमात्रविषयं तदित्यपास्तं। आरण्यकेति। अरण्यास्म इति णो नात्स्वार्थे कः वुञ्तु न पथ्यध्यायादिष्वेव तद्विधा
नात्। विशेष्येति। एकदेशी भवनेत्यर्थः संश्लेषार्थत्वे सप्तमीत्यन्ये सास्यास्तीति। लिंगविशिष्टपरिभाषयादिष्टाश इत्यस
स्य इति भावः। मानाभावादिति। पूर्वोक्तकोशादिनरकोशानुपलंभाच्चेति भावः। रिष्टमिति अस्यमतिर्दिष्टिक इति भा
ष्यविरोधाच्चं एतेनाशीआधिविसिद्धादिष्टाशब्देन सूत्रे समाहारद्वंद्व इत्यपास्तं। तावतापि प्रमाणानुगतेत्यर्था लाभा

सू० २०

च्चा। युगं रथांगमिति। रथसाहचर्यात्तदंगस्यैव युगस्य ग्रहणमिति भावः। शरः स्वरूपापेक्षयेति। सौत्रं ह्रस्वत्वमित्यपरे। प्रा
युंक्तेति। तेन सूत्रे जन्याः इति सविसर्गपाठ इति सूचयति। भाष्येपि जनी इत्यादेः पंचमीत्युक्तं। एतेन निर्विसर्गपाठं पठि

× सा ३

त्वा स्त्रियामेवास्य पुंस्त्वं वदंतः परास्ताः। सापेक्षत्वादेवेति। तन्मूलकासामर्थ्यादित्यर्थः। इदं प्राचामनुरोधेन। प्रधानस्य
सापेक्षत्वात् क्रियायाः कारकांशे नित्यसापेक्षत्वाच्च प्राप्तोत्येवात्र प्रत्ययः स्पष्टं चेदं कैयटे। तस्मात्करणप्रयोगे माभूदित्य
र्थमधनुषेति। अन्यथा पद्याः शर्करा इत्यत्रापि न स्यात्। संभाव्यते हि तत्रापि तैक्ष्ण्यस्य करणता। चौरं विध्यतीत्यादौ तु नभि
धानान्नेति दिक्। करणप्रत्यर्पणादेरिति। करणप्रत्यर्पणपर्यंतमित्यर्थः। कर्तरीति। मूलेनानाम्न्यमित्यत्र कर्तरि तनी
यावोध्या। कृद्योगादिति। प्रीणातीति प्रिय इति व्युत्पत्तेः सूत्रे इति भावः। अलौकिके त्विति तत्र कृद्योगाभावान्न षष्ठीप्राप्तिः

।अन्यत्रापीति।जनस्यजल्प... इत्यादौ।नद्यं नविधिरिति।हलांशे इति बोध्यं जनो जन इति।विग्रहे मतिशब्दस्य योगे
ण कर्मप्रवचनीययुक्तत्वाभावाद्द्वितीया न चास्वपदविग्रहत्वे नित्यसमासत्वापत्तिः।अस्वपदविग्रहत्वस्य नित्यत्वेप्र
योजकत्वाभावात्।नित्यसमासत्वं परमस्वपदविग्रहत्वे क्वचित्प्रयोजकमित्यन्यत्।स्पष्टं चेदमषडक्षाशितंगिति सू
त्रे भाष्यपदमञ्जर्योः।वेद भाष्य इति।अत्राहुश्चिर्वीजं तु नलोपे हनो यद्व धश्च वक्तव्य सङ्कतो वेति भाष्यविरोधः।
नत्राहि वधशब्दाद्डीपि यतिवध्यः साधितः न हि सम इत्यस्मिन्वेलायां घञ्ञ्कः उक्थ्यस्तु छान्दसो ध्य इति दिक्।आपुरा ×बो३
नः स्यादिति।उक्थ्य इत्यर्थः।तीर्थे ये इति।याद्रौ प्रत्यये विवक्षिते तीर्थे उत्तरपदे समानस्य स इति तदर्थः।समान
मिति।समानोदरशब्दे इति शेषः।नानुवर्तन इति।अत एवेदं सार्थकं।अन्यथा यति ये वा रूपे स्वरे च विशेषाभावेन

शा॰ ९॰

पूर्वसूत्रे णौ चैकदेशविकृतन्यायेन सिद्धावस्य चैयर्थ्यस्य शंमेव। सहसमानमिति। सूत्रे तूत्तरपदार्थस्यैव ग्रहः शपिन
ऊत्स्यन्वयायेतिभावः। इतिमाध्यिनीयाः। ननु भस्य य इत्यादि। तथासति प्राकृठभः प्राग्दिक्षादिति वा वदेदितिभावः। ते
षु। तद्बोधकशास्त्रेषु। प्राकृठत इत्येवमकरणे फलमाह। एवं चेति। अन्यथा। प्रकृतिप्रत्यययोरवधित्वे। सन्निधानावि
शेषादिति। प्रतिसत्तमस्योपस्थितेरित्यर्थः। पर्यायः स्यादिति। शरीरावयवात् उगवादिभ्यश्चेत्यर्थः। मास्त्विति। मा
ग्वेनेष्वित्यधिकारेण तावच्छब्धत्वान्न तु उत्तरमस्योपस्थितिरिति भावः। तद नुगुणत्वादिति। चलनरूपतत्क्रियानु

× ३।१।२

गुणत्वादित्यर्थः। परेण। आदेशसंनियुक्तनशांवयवाघटितस्य नेन। संप्रसारणाद्यावति। आदिना पूर्वरूपं। न च संप्र
सारणे शुश्रनिनिस्थिते पूर्वरूपं बाधित्वा वर्णादांगमिति न्यायेन प्राप्तदिलोपस्य ये चेत्यनेन निषेधे पूर्वरूपेऽपि न पु.

नष्टिलोपोऽभ्यस्तावसरत्वादिति वाच्यं। नस्य न्यायस्यात्रशास्त्रेऽनाश्रयणात्। निरूपितं चैतदन्यत्रेति दिक्। सुबन्तमिति
ऊधन्यत्राश्वादाचारक्किवं नादात्मनेपदार्थेतु। नतत्राचारक्किपोऽभावात्। ऊधन्यशब्दात्क्यच्यात्मनेपदार्थं ङित्व
मितित्वसंगतं। यं समुदायं योवयवः [illegible]बोनव्यभिचरति तत्समुदायोपकारक एव तदवयवधर्मो नान्यस्येति गुणितमादिसू
त्रेभाष्ये स्पष्टमुक्तत्वात्। ङित्वसामर्थ्यान्न्यायबाधकत्वं नापेक्ष्यमन्यत्रकृतमात्र उ एवाचोच्चारणमित्यस्यैवयुक्त
त्वात्। ननु स्याद्गोलाक्षालिकत्वेनयेचेति प्रकृतिभावानापत्तौ टिलोपापत्तिः अनुस्तहरणेनद्रमात्रेः ध्वनितं चेदं उ
धसोनकारेलिंगाधिकारे वक्तव्यः इहमाभूत्। महोधाः पर्जन्यइतिवह्वृचीहेरितिसूत्रस्यभाष्येणां ऊधसोनङितिस
मासांतमकरणेसूत्रं नत्वस्याधिकारे कर्तव्यमिति नान्तस्यर्यं। नत्वनकारइतिवदनात्सूत्रे ऊधसशब्दविषयेऽकारउका

137

सू० १०

रौ व्यर्थौ विनिसृष्टि नं । नञ्चोक्तकल्पनायामेव संगच्छत इति दिक् । तस्य । हविः शब्दस्य । अपंचार्थ इति । यद्यासा द इत्येना ऽ
वृत्पाद्यो ऽन्यत्र वर्तनेन ह्रागौणमुख्यन्यायेन प्राप्तिरेवास्य न । अन्यत्र तथा दृष्टत्वेन अपंचार्थत्वमेवोचितमिति भावः
कैयटेति । उगवादिभ्य इति सूत्रे । लक्षणोचितेति । आदितिमोदनेनेति वाक्यशेषस्य लक्षणेनास्यर्येत्याह कृत्वानुप्र
सिद्धार्थसमन्वयेन । तत्संबंधरूपेण हृत्संनरेणेत्यर्थः । तत्संबंधमूलकेन हृत्संनरेणेत्यर्थः । अर्त्तमन्विश्वेति । यद्यपि तत्र
नकारेणासंदेहाय आकारांतात्मशब्दाभावात् । किंतु प्रकृतिपरिमाणार्थे । तेनासमासग्रहणज्ञापिततदंतविधिरत्नेन
निवृत्तौ स्पष्टं । किंच प्रकृतेन नकारानुच्चारणे नोभयोर्ग्रहणं प्राप्नोति तदुच्चारणे ऽमात्राणोरवंचनं तथापि व्याख्यानादेवा
कारांतमात्रग्रहणमिति तत्त्वं । आकरः । भाष्यं । नांगीकृत इति । यथा चैतास्य संग्रहो वृत्तिकारादिभिरंगीकृतस्तथागवादि

षुपादेन संग्रहो नांगीकृत इत्यर्थः स्त्रीलिंगादपीति। अजञ्चाद्यादविञ्चाद्येत्यर्थः। अविञ्चाद्यस्य नित्यस्त्रीत्वात् पुंवत्त्वं नेति
केचित्। अन्ये तु तमपि भाषितपुंस्कमिच्छंति। तेन षष्ठीति। पंचानामित्यस्य संख्येयसापेक्षत्वेपि प्रकरणादिना विशिष्टसंख्ये
यहनित्वावगमे पंचजन इत्यत्रापि न तत्संभवो बोध्यः। नत्वाप्रकृतेर्विकृत्यर्थत्वं वा। आह चेति। इदं योगवादिभ्य इति सू
त्रे भाष्ये स्पष्टं। दीपीस्यादादिविति। इत्यादावेवस्यानत्त्वनेष्टमिति भावः। संभावनेनेति संभावनेल्मित्यत्र योगविभागात्
उपसंवादाशंकयोरित्यत्र भाष्याक्तवचनाद्वेति भावः। छयतोः पूर्णावधिः। अपवाद इति। यद्यपि तेठञपवादष्ठकोपवादा
स्तथापि अपवादापवादस्य सुतरां तदपवादत्व[illegible]मिति भावः। पर्युदास इति। गोपुच्छादीनामित्यर्थः। चयोरइशेति। ठ
कठञौ २ ठञ्यतौ ४ कनठुन्दिठनः ७ अञ् ८ शालमानापण् २ ख १० ईकन् ११ पणादियत् १२ ढिञीतिवार्ति

न्या०र०

कोकारण ९३ चेत्येवंत्र योदृशेत्यर्थः। अनन्यार्थस्य। क्लीनाघर्थानिरिक्तार्थरहितस्य। अर्थ एवेति। वनिशब्देनतदर्थोल
क्ष्यते इतिभावः। आख्यानमेवेति। प्रथमोपस्थितत्यागेमानाभावादितिभावः। अन्येतुआर्हादित्यनेनवस्त्वर्थग्रहणे विशेष
विहितकनावनेर्वाधेएकवद्भावस्येतिप्रयोगासंगतिः। नतद्ग्रहणेप्रत्येवनेरित्यनुवृत्त्यैवसिद्धेः आर्हादित्यस्य वैयर्थ्यमित्याहो
दित्यप्युक्तार्थेप्रमाणमित्याहुः क्वचिदूर्ध्वाधरेति। नाद इत्यस्योर्ध्वमानत्वादुन्मानत्वमपि। ननूर्ध्वनयन्नाह ऊरुद्वयस
मितिंयदितुनस्य प्रमाणत्वेमतस्यात्तदाप्रथमस्य द्वितीयश्चोर्ध्वमानेमतौममेत्युक्तेरत्रद्वयसच्दुर्लभः स्यात्। नचात्र
प्रमाणत्वस्यापिसत्वात् प्रमाणेलइतिलुगापत्तिरितिवाच्यं। आयामविवक्षायांप्रमाणमित्येतद्वत्तीतिअत्रभाष्योक्ते
र्विद्यमानस्याप्यूर्ध्वाधरभावकृतायामस्याविवक्षयातदप्रसंगात्। विवक्षाचप्रयोगानुसारिणीत्यदोषः संभवमात्रेणानु

प्रमाणत्वं तस्योक्तं। तिर्यगवस्थितवस्तुपरिच्छेदकेतु प्रमाणत्वं निर्विवादमेवं भिन्न्योपि वहिर्भूतेति। अनेन संख्यायाः सर्वे
थावास्थत्ववदनेनरेषां परस्परग्रहणं सूचितं। तेनोन्मानस्य परिमाणग्रहणेन ग्रहणं। अत एव परिमाणविस्तेति सूत्रे
विस्तादिनग्रहणं परिमाणेनास्येत्यस्य त्र्याणपर्युदासश्चरितार्थ इत्यलं। एतच्च पदमंजर्यामिति। अत्रारुचिवीजं तु भाष्य
विरोधः। इति विरोधादिति। अपूर्णादिग्रहणमपंचार्थमिति हि वृत्तिः। गणसूत्रेपि नदं न विधिरस्येवेति बोध्यं। उत्तरप
दलोपीति। साहित्यं चैकविभक्तिनिषेधान्वयित्वेन। सूत्रेतु दं ढूगर्भो वहुव्रीहिरेवेति बोध्यं। लौकिक्या इति। संख्याग्रहणे
कृत्रिमा कृत्रिमन्यायाप्रवृत्तेरिति भावः। प्रथमायाः षष्ठीमिति। नित्यसापेक्षत्वान्नासामर्थ्यमित्यपि बोध्यं। द्वितीयस्येति
।ठत्त इत्यर्थः सप्त्यप त एवेति। द्विगुनिमित्तत्वाभावादिति भावः। संख्यावाचीति। एवं च तत्पूर्वसमासस्य द्विगुत्वान्नैनेव

श०२०

सिद्धं। सूत्रे च द्विगुसाहचर्याद् ध्यर्द्धपूर्वोपि समानाधिकरणसमास एव गृह्यते। तत्रास्य संख्यात्वेन दिक्संख्ये इति नि
यमादन्यस्यासमासेन तद्धितार्थे साधितानां द्विगुरेवेति भावः। उत्तरपदवृद्धिः स्यादिति। अध्यर्द्धसाहस्रमित्यत्र तेनैव तन्निमि
त्तप्रत्ययोपि संगृहीतः। अध्यर्द्धग्रहणं च समासकन्विध्यर्थमिति वार्त्तिके समासविधिशब्देन समासरूपो विधिस्त
न्निमित्तको विधिश्च गृह्यते। अस्त्यः संख्यापूर्वपदकतद्धितविधिनिमित्तकः प्रत्यय उत्तरपदवृद्धिश्चेति भावः। लुकि
चाग्रहणमित्यस्य भाष्यस्य प्रत्ययलुगर्थेन कार्यं ज्ञापनार्थं त्वस्ति स्यर्थ इति तन्न द्विरोधः। प्राग्वतेष्ठञिति। समासे
समासे निष्कादिभ्य इति ठकोऽप्राप्तेरिति भावः। मर्मान्तरेखिति। असमासे इति परिमाणविशेषवाचिनिष्कादीनामेव
ग्रहणं। अत्र नूत्मानो रोमभूषणादिवाचिन एव ग्रहणं मसिद्धत्वादिति मनेर इत्यर्थः। नस्येवानुवृत्तिरिति। अर्धाधिका

४७१ ।नदंनुवृत्तौ तुष्यत्राबाधादरणंचित्यः। इत्यादावपीति। आदिनाभाग्दीव्यन इति। अपिःसौलभ्ये। अस्तुवेत्यनेना
त्रसमाधानेऽनास्थासूचिता। नद्वीजं तु अनुकरणंचानिति इत्यस्यकृत्स्विषयत्वसिद्धंन इति बोध्यं। सर्वदाइतिम ४वे
नीकृपाकः। एकीयमनत्वेनेति। अत्रारुचिस्तु बहूनां पाठस्यैवं वैयर्थ्यमापत्तीति। सुवचमिति। माणसंबंध्यर्थक
स्यमाणकृर्तृत्वार्थकस्यचनपर्यायत्वंफलेतुनविशेष इत्यन्यादिति भावः। देवदत्तत्वमिति। पारिभाषिकज्ञानित्व
स्यनत्राभावादिति भावः। संपानगृहणमिति। अन्यथायस्येत्यकारलोपस्यासिद्धत्वात्स्थानिवत्वाच्चेकारांतस्यभ
त्वाभावेनयस्येतिलोपाभावाविकारस्यपणेवस्यादिति भावः। इगवधिकमेवेति। तेनकृशानुत्वमित्यत्रन। इत्या
रे इति। इदमेव युक्तं। विषयभूतेष्विति। श्लाघनइत्यादि पदांतरोपादानेनन द्विषयोस्त्येवेति भावः। विभक्तेरिति। तत्रादे

श०र०

नरापाइत्यर्थः। ।नञ्स्नञोरधिकारः समाप्तः। ।धान्यानां। इदं। धान्यानामित्येषा। निर्देशादेवेति। व्रीहिशाल्यो
रिति धान्यानामिति च षष्ठीनिर्देशा[illegible]देवे[illegible]त्यर्थः। नन्वलौकिके भवनशास्त्रप्रयोगाभावेन रूढ्योगलक्षणप
क्षादुर्लभत्वेन कथं सा समर्थविभक्तिरत आह। अलौकिक इति। न चालौकिके तृतीयेति युक्तं। भवत्यर्थवाच्यभ
वनस्याक्रियात्वेन तस्या अप्रवृत्तेः। कर्तुरेव शेषत्वविवक्षया षष्ठ्यां तु न कापि शंका। ननु यवयवकेत्यादौ
भिन्नविभक्तित्वाद्धान्यानामित्यस्यासंबंधेन का समर्थविभक्तिरत आह। अत्रेति। अलौकिके तु भागवदेव तस्य
वेशः। न चेति। एवं च [illegible] खञ्प्रिया तेइत्यसंगतमिति भावः। पाठादिति। शाणपाठेन तयोरपि शाणत्वेन तत्रपा
ठादित्यर्थः। भट्टिकाव्येत्विति। एवं चोभयप्रामाण्यादुभयोरप्यत्र संग्रहणं। दर्शनशब्दः कर्मव्युत्पन्नोपीति भावः

।कर्मशक्तियोगे सतीति।इदं तस्याभिमतार्थके।भस्य यसन्नियोगेनेति।अत एव भाष्ये सममुखस्य दर्शन इति
विग्रहो दर्शितः।साधर्म्यादिति।संमुखीनादर्शादिनेति शेषः।हरदत्त इति।कैयटोप्येवं ग्रहणेन ग्रहणादिति।
समासांतानां समासावयवत्वादिति भावः।यस्य चेति।पादसंबंधि दैर्घ्यं सदृशा दैर्घ्यवतीत्यर्थः।पथ्यार्थे इति।प
देन सदृशीत्यर्थोऽत्र।स्थलविशेष इति।अयानयं पदस्य गतिविशेषे रूढस्य स्थलविशेषे लक्षणेति एतद्भावः।यु
क्तं चैतत् देवमय यः प्रदक्षिणगमनमनयः प्रसव्यः।प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन्पदैः पदानाम
समावेशः सो[illegible]यानय इति भाष्यात्।एकद्यूतकारापेक्षया शारस्य प्रदक्षिणगमनमयो द्वितीयापेक्षया प्र
सव्यं वामापरपर्यायं गमनमनयो रुभयोऽप्यनेन इत्यर्थ केन प्रसव्यमित्यनेनेत्र शाक्यार्थ उक्तः तनस्त्वाद्दशागतिशालि

सू०२०

नां शाराणां यस्मिन्न्यदे युग्मादिपदे स्थितानां परैः परकीयैः शारैस्तत्स्थानभूतानां पदानां समावेशः संबंधः तद्वाधा ×म१
भावरूपस्तत्सद्मयानय इति लक्ष्यार्थोदर्शितः स इति पुंस्त्वंत्वयानपस्य पुंस्त्वात् । गतिभ्यां नेया इति । सर्वत्र ससहा
यपदेस्थापनपूर्वकमिति शेषः । नेहि ससहायपदरूपमयानयं स्थानविशेषं प्राप्यैव फलकशारः प्राप्यंत इत्यपा
नयीना इत्युच्यंत इत्यर्थः तद्वा । ससहायस्येति । शेषद्वादशकोष्ठोपेतत्वं । केचिन्मते द्वयोः पर्युदासबीजमाह । प्रद
क्षिणप्रसव्यने चेत्यादि । नेवसकैकं कि । नवंप्रतिप्रदक्षिणप्रसव्यने च । अन्नमते गतिविशेष एवायानयः तद्
कं गतिविशेष इति मतांतरं । तथा च कैयटः । तत्र केचित्फलकशारस्य स्वस्यैव स्वशारवर्गमाने यस्यायानयीनामि
त्यभिधानमिच्छंति । यत्तु शार एकपार्श्वे एव संचरति तत्र न भवति प्रसव्यः यो हि शारः पार्श्वात्पार्श्वांतरं नीयते स

एवाथानयंनीयते अन्यस्त्वयमेवनीयतेऽनयमेवेति। एतदुक्तं येन दृष्टवद्वीथीत्यादिलाभः कथमिति पुनश्शास्त्रेद्वैध
दुक्ष्युतेर्निर्णयं। सोपिभविष्यत्येवेति। भूतवर्तमानयोरावश्यकत्वबोधनस्यव्यर्थत्वात्। एवंचाकेनोरिति षष्ठीनिषेधा
न्नद्वितीया। तत्रभाविष्यदधिकारविहितणिनेर्ग्रहणे तु नमानं। अतएवांशंहारीतिनिर्देशः संगच्छत इतितद्भावः
। तत्कर्मण इति। भावनामात्रकर्मत्वस्यार्थः। संकोचे। प्रकृत्यर्थैकदेशकर्मणो ग्रहणे। तस्याशयः इति। यदितु एवं द्वि
तीयापितस्यान्नद्विधावपि संपूर्णप्रकृत्यर्थकर्मणो ग्रहणापत्तेरित्युच्यते तदा षष्ठीविधौ कर्तृसाहचर्येण धात्व
र्थेप्रति भेदेनान्वयि यत्कर्म तद्ग्रहणे। क्रियाविशेषणस्तोकादीनां तु नैवंविधत्वमिति ततः षष्ठी। द्वितीयानुभव
स्यैवाऽत्रवनद्विधायकेसाहचर्याभावादिति तदाशयो बोध्यः। विभक्तित्रयेति। सप्तमीपंचमीप्रथमेत्यर्थः। अत

शा०र०

एवा।कर्मत्वायोगादेव।अस्वपदविग्रहत्वाऽऽगच्छतीत्यनेनैव विग्रह इति षष्ठ्यादिशंकैवासंगतेति केचित्।तन्न।सूत्रे
षष्ठीशंकासत्वात्।अनुगु अलंगामीत्यर्थे प्रथमोच्चारितानुगुशब्दात्स्य इत्यर्थान्।यदि त्वनुगु इति सूत्रे लुप्तपं
चम्यंतं अस्मात्स्य इत्यर्थस्तदा नत्रापि न शंकेत्यन्ये।अन्यपत्वेन विभक्तिलुकः सत्वेन न केप्यत्र विचार इ
त्यन्ये।क्रियाविशेषणत्वादिति।फलद्वारा क्रियान्वयित्वादिति भावः।गामीत्यनेन गच्छतीत्यर्थकेन विग्रहे तु षष्ठ्ये
व समर्थविभक्तिरुचितेति केचित्।अलंगामिपदेनैषां वाक्यं नेष्यत इति मतेन एषु गच्छतीत्यस्वपदविग्रह ए
वेत्याशयेन मूले सर्वत्र गच्छतीत्युक्तिः।क्रियाविशेषणत्वादितीयत्युक्तिश्चेति बोध्यं।संघातवाचीनि।नाना
जातीयानामभिन्नवृत्तीनां शारीरस्यासज्जीविनां संघात इत्यर्थः।भारेति।भावनपदेन कर्मणिल्लाश्रणिकमि

नाह। सूत्रमेवमास्त्विति। यद्विधाविति। केचित्तु वाग्रहणाकरणलाघवानुरोधेन सूत्रे विभाषेत्यनेन नरमिदं वार्तिकं
पठंति वधादेशश्चहलंतं इति सपन्नामतन्मतानुसारेणेदं। अत्र ध्येतु कृत्योकेष्णुच्चार्वादयश्चेत्यस्य समहनेर्न दोषः॥
भाष्ये तु यद्विधाविदं वार्तिकं पठितं। हंतेर्वा यदिति च व्याख्यानं। इंडादिभ्योय इति पाठाशुद्धिस्तु भष्यापि सिध्यती
ति लाघवानुसारेणैवमेवोक्तं। कृत्यस्याप्यर्हे विधानान्नार्थभेदस्तयोरिति बोध्यं। आद्युदात्तत्वमिति। धातुस्वरेणे
ति शेषः। स्वरोभिधेनेति। अंतोदात्तत्वापत्तेः। यद्विधौ हतो वेत्यादि अग्रेपि यनियतो नाव इत्याद्युदात्तत्वादिति पाठ
स्तु पुकरणेवेति दिक्। पतन एवेति। छंदसि तथैव लक्ष्यदर्शनादिति भावः। निष्पूलीकृता इति। त्रिः कंडनैः संस्कृता इत्य
[illegible] र्थः। वार्तिकोक्तत्वं नइत्यस्यसार्वविभक्तिकत्वमसंव्यावर्तयति। अत्र पंचम्यंता दिति। प्रत्याख्यानमि

ग्रा०२०

नि। विग्रहदर्शनान्नित्यग्रहणमनर्थकमिति न चोक्तं मूले नित्यं गच्छतीति विग्रहप्रदर्शनं तु वृत्त्यनुरोधेनेति भावः
। स्वरूपग्रहणमिहेति। तन्मात्रग्रहणमित्यर्थः। व्याख्यानमिति। वृत्तिकारादीनामिति शेषः। अवयसीति सूत्रभा
ष्यात्तु अत्राप्यननुवृत्तिरेव लभ्यते। परत्वादिति। उत्कृष्टत्वादनन्तरं गत्वादित्यर्थः। एतेनैनग्रहवाक्ये एव समासान्तप्रवृ ×वि३
त्तेः परत्वमप्युक्तमित्यपास्तं समासान्ते कृते। हनूशब्दान्न ङीगोरभावान्न प्रकृतसूत्रस्यैवाप्राप्तिरिति भावः। न च शं
कृतेन नरेति। समासान्तेष्विति। न दृष्टवन्तो हि अल्लोपो नइत्यल्लोपे हृस्वान्तिक इत्यस्य सिद्धिरिति भावः। मन्यत इति।
अत्रारुचिस्तु भाष्यकृतो महानाम्निकमित्यकृत न पुंवद्भावोदाहरणविरोधः। वाक्यादपीति। अपिना अखण्डस्य
यादित्यपि सूचितं। कल्पशब्दस्येति। पाठेनस्यैवेत्यर्थः। कल्पशब्दो हि ईषदसमाप्तिवाचीति संख्याया विधार्थे इति सूत्रे भाष्य

कैयटयोः। मध्यमिति। न द्रव्यमात्रस्याव्युत्पन्नत्वमेवेति तात्पर्यं नपुंसकमिति। सूत्रे उदाहरणे चेति शेषः। न चापि
व्यापारविशेषणत्वं तु। लक्षणयेति। एतेन जातिविशिष्टं द्रव्यं ब्राह्मणशब्दार्थो न च तेन क्रियायास्तुल्यत्वमस्त्वं न भेदा
दित्यपास्तं। सौष्ठवादिष्वसाधारणो धर्मः। इत्यर्थ इति। गुणपदमक्रियोपलक्षणमित्यर्थः। उपरस्या इति। पर्वतेष
वीसमत्योरदर्शनात्तत्र तस्येवेत्यनेनापि न वतिः। भेद्येति। भेद्यं विशेष्यं भेदकं विशेषणं संबंधस्तयोः संसर्गः उपा
धिः पश्वादिः। इत्याहुरिति। अत्रारुचिबीजं तु भाष्याद्यननुकूलत्वं। ननु मथुरायामिव पाटलिपुत्रेऽधीतेत्यस्य मथुराया
तुल्यमधीत इत्यस्य च तुल्यत्वात्पूर्वसूत्रेणैव सिद्धमत आह। द्रव्यगुणादीनि। आख्यातं चेति। यथावत्व्याख्यान
हत्तायेत्यनेनदभिप्रायकमिदं। योग्यपदविधानमाख्यातं वा तत्कर्माधिकरणादिसंबंधिनेत्यर्थः। द्रव्यत्वादेरिति। दृष्टि

शृ०२०

वीतमाहिम्नास्थं।प्रयोगोपाधिरिति।वस्तुगत्याप्रकृतिजन्यबोधप्रकारोयस्तस्यधर्मत्वेनभानमित्यर्थः।एतावतै
वप्रयोगोपाधिरितिव्यवहारः।द्वितीयेत्विति।तुनाऽरुचिः सूचिता।तद्बीजं तु सर्वत्रप्रकृतेर्लक्षणायांनमानं।किं
च।नस्येस्यस्याचशास्त्रपरत्वेगुणवचनेनितिसूत्रेकर्मणीत्यनेनान्वयः।भाष्येतुसंज्ञाशब्दद्रव्यमात्रबोधकत्वमि
तिमते प्रकृतिभृत्यर्थयोर्भेदानुपपत्तिमाशंक्यायंपक्षएकदेशिनोक्त इतिबोध्यं।प्रकारतयेति।प्रवृत्तिनिमि
त्ततयेत्यर्थः।एतन्मूलिकैवसंबंधा[illegible]भिधानमित्युक्तिरित्यन्यत्रविस्तरः।शब्दकौस्तुभे।हरिद्वारै चसूत्रस्थे।ल
क्षणात्र इति।अत्रग्रहणं नरपवाद्पुरोहितादियकोप्युपलक्षणं।एतेनबालस्यपुरोहितादिषुपाठेनबालाद
× युक्तमित्य१ नइत्यपास्तं।सिद्ध इति।ष्यञीत्यर्थः।इगंतत्वादणपीतिइदं चात्रवेत्यनुवर्तयनामते बोध्यं।एवंसांमतमित्यपि

रस्योचित्या — दिति भावः। परिच्छेदकमात्रमिति। उन्मानमपीत्यर्थः। नचनन्द्रहणस्यैव भाष्यसंमतत्वात्। मुख्यमते
त्विति। दर्पणकारादिभिर्मुख्यमतत्वेन व्यवहृतत्वेनेत्यर्थः। तु नाहु चिर्वोधिना। नह्वीजं तु नस्य भाष्यासंमतत्वं। पूर्वेणेति।
पणपादेत्यनेन। अत्र च भाष्यंप्रमाणमिति। शाणशारस्यैव नचोदाहरणादिति भावः। अस्यत्रेति। मूल्यद्रव्यभिन्ने कर
णकर्तरि चेत्यर्थः। हरहनइति। अत्राहु चित्तु भावसाधनग्रहणेन मानेनापि फलमिति भाष्यस्य संयोगो नामेदंकृ
त्वेदमवाप्यनेइति मनीके करणास्तस्यायागादेरेवसंयोगत्वं कैयटेनोक्तं। धनपतिसंयोगोपीदृश एव तेनापि पुरुषाः
फलेन अन्नवासआदिरूपेण संयुज्यन्त एवेति। यथासंख्यनिरासार्थइति। अनुवृत्तेन सर्वभूमिपृथिवीभ्यामित्यनेने
ति भावः। नक्र्तरीति। आख्यानादिति भावः। नोद्भावनीयमिति। ये त्वेनंनित्यसापेक्षं अनुवतेनेषामपि रूढत्वाद्रस्यैव

श्रा०१०

ग्रहणं न्याय्यमिति नास्त्यर्थे। अस्त्येकमिति। यद्यपि न तथा विवक्षा न स्युस्तन्ति सिद्धं न तथापि सौत्रत्वादेव न तथा विवक्षां कृत्वा ए
कवचनं प्रयुक्तमिति भावः। सूत्रे न्ततीयोपसर्गग्रहणं व्याप्यवर्त्तते। पञ्च इति। स च हरतियोगे उपसंख्यानं समानार्थ इति भा
वः। छेद इति। अत्र मानमुत्तरसूत्रे ब्याढकीति भाष्यप्रयोगः। उत्तरसूत्रे इति। अर्थाधिकारानुरोधेनोत्तरसूत्रनिर्णी
तार्थग्रहणस्यैवौचित्यमिति भावः। न तस्य च स्येति एकविंशे तस्य च स्येति च पाठः। तिलोपार्थम्। तिलोपे कृते भत्वादन्तो
गुण इति पररूपं। ज्ञानिरिति। अत्र पक्षे निपातनादन्तोदात्तत्वं। अत एव भाष्ये एष व्युत्पत्तिपक्षोऽप्युक्तः। ज्ञानिर्जितिपा
ठस्तु प्रयुक्त एव। अपरत्वं चेति। तस्फलमनुस्वारः। मंत्रे भाषायां चेति। तथा चेत्यादिः। भाष्ये इति। विग्रहदर्शनान्तिस्य
ग्रहणमनर्थकमिति हि भाष्ये उक्तं। एवं च छेदमर्हतीत्यत्रार्थे एवास्य साधुत्वं न त्वर्हतीत्यनेनैव सिद्धमित्याशये

त्यर्थः। कृत्वा विति। भाष्ये प्येवमेव। प्रतीतइति। प्रसिद्ध इत्यर्थः। क्रियाविशिष्टेति। ससाधनक्रियावाचकादिति भाष्ये
साहित्यमात्रं विवक्षितमिति भावः। लोके विपरीतार्थप्रतीतेः। वर्तमानादिति। अवशाद्वादिति शेषः। अर्थे आदि
ष्विति। समुच्चयार्थकान्वनरस्याग्रहणेन प्राप्तोपि मतुप् अनभिधानान्नेति सर्वं भाष्यकैयटयोः स्पष्टं। प्रमाणे
इति। नत्र प्रकृतिविशेषणमर्थद्वारेति भावः। परिच्छेदकमात्रमिति। नात्वायामपरिच्छेदकमेव व्याख्यानादिति भा
वः। कैयटेपि मात्र चरत्वविशेषणपरिच्छेदकमात्रे स्मरणादिति प्राहतेन प्रस्थमात्रमित्यादिसिद्धिः। प्रमाणशब्द
त्वेनेति नत्वेन प्रसिद्धा आयामपरिच्छेदकारस्यर्थः। अनूर्ध्वमानत्वादिति। शमो दिष्टिरित्यादावनूर्ध्वमानत्वेन वि
वक्षितत्वादित्यर्थः। यदानूर्ध्वाधरदिग्वस्थितवस्तुपरिच्छेदकत्वविवक्षा न तदा ह्यसञ्जादि। अप्रमाणत्वात्तु नस्य

प्रा०२०

नलुक्। अत एवाहार्दिति सूत्रे आयामविवक्षायां प्रमाणमित्येतद्वर्त्तीति भाष्ये उक्तं। अप्रमाणे लुगिति एतत्साम
र्थ्यादेव प्रमाणं न द्विगोर्मात्रचः। नेहेति। समर्थानामित्यादेरनन्वयेन तत्संबद्धमहाविभाषाया अप्यसंबंध इति भा
वः। तथा चाधिकेति। एतत्सामर्थ्यादेव प्रमाणं न द्विगोः संशये मात्रच् न तु परिमाणं घं नादप्राप्तेः। तेन पंचकुड
वाः स्युर्न वेति संशये वाक्यमेवेति दिक्। प्रमाणत्वेनाप्रसिद्धत्वादिति। केदारप्यायामापरिच्छेदकत्वादित्यर्थः। पुरु
षात्प्रमाणे इति सूत्रे प्रमाणशब्दस्तु परिच्छेदकमात्रपर इति भावः। अनुमापयतीति। द्विहस्तीति तु विंशत्यमेवेति भा
वः। न च द्वौ पुरुषौ प्रमाणमस्या इत्यर्थेन तस्य परिमाणमिति ठकष्ठञो बाध्यर्थं पूर्वेति लुकि शास्त्रस्य चारितार्थ्येन
कथं तत्सामर्थ्याल्लुक्कल्पनं न त्वहि परिमाणशब्देन परिच्छेदकमात्रमिति सिद्धांत इति वाच्यं। अतद्धितलुकी

७८

= ३.४

स्यचनहितस्यप्रमाणपदमुख्यार्थविहितस्यैवग्रहणंप्रत्यासत्तेरितिहृत्स्यनुसारेणानुमानमित्याद्यायादिनिर्दि
क। ननुप्रमाणइत्येवेति। पूर्वसूत्रेप्रमाणग्रहणंपरिच्छेदकमात्रपरंप्रस्थमात्रादिसिद्ध्यर्थं। इदमपियावानध्या
यावनीरत्न्यर्थावजलमधिकरणेनाक्तत्वेचेतिप्रयोगात् परिच्छेदकमात्रइष्यतइतिभावः। भाष्येपिकिमर्थंप
रिमाणइत्युच्यतेनप्रमाणमित्येवसिद्धमित्युक्तं। प्रमाणपरिमाणयोरेकार्थत्वंमत्वाप्रश्नइतिकैयटः। प्रागेवो
कत्वादिति। एवंचेहपरिमाणग्रहणंसर्वतोमानमात्रार्थकमितिभावः। स्वारेनदिति। अन्यत्प्रमाणमन्यत्प
रिमाणंशाब्देनायामपरिच्छेदकमेव। प्रस्थमात्रमित्यादयश्चासाधवएवंनप्रमाणइत्येवसिद्धमितिभाष्यस्याय
मर्थं स्तदनुवर्त्यपावानध्येत्यादिकमेवमुख्यमस्तुपरिमाणप्रयोगाएवोपमानाद्भवन्तीतिभावः। विशेषवि

×मित्यत्र भाष्यात्पूर्वसूत्रेप्रमाणा २४

ग्रा०र०

परिमाणग्रहणस्य सर्वतोमानपर हित इतिपदादिपुरस्कारेण विहितत्वादिति भावः। भिन्नोपाधिकत्वादिति। परिमाणग्रहणस्य सर्वतो मानपर हितत्वादिति। पूर्वसूत्रे प्रमाणग्रहणेनायामग्रहणे प्रथमश्चेत्स त्वादिति भावः। नन्वत्र प्रसमात्राद्रीनि अद्रिग्रहणं व्यर्थं। पूर्वसूत्रे प्रमाणग्रहणेनायामग्रहणे प्रथमश्चेत्सा त्वादिति भावः। नन्वत्र पक्षे मात्राद्रीनि अद्रिग्रहणं व्यर्थं। एवं चायामार्थकप्रमाणग्रहणानुवृत्तावप्युपाधिभे दिनाद्वयसच्‌द्घ्नौ प्रमाणाद्‌पकृष्योर्ध्वमाने विधीयेते। एवं चायामार्थकप्रमाणग्रहणानुवृत्तावप्युपाधिभे दिनाद्वयसच्‌द्घ्नौ प्रमाणाद्‌पकृष्योर्ध्वमाने विधीयेते। ऊर्ध्वत्यागे सर्वग्रहणापत्तेः। न दंगीकारे उन्मानस्य दानद्धाधामसक्तेः। न च प्रमाणशब्देनोन्मानस्यापि ग्रहणं। रूढित्यागे सर्वग्रहणापत्तेः। न दंगीकारे उन्मानस्य दानद्वाधामसक्तेः। न च प्रमाणशब्देनोन्मानस्यापि ग्रहणं। कथं ग्रहणमतो वार्तिकस्याघामवतारणिकां सोपस्कारामाह। नन्वेवमपीति। वत्विति। येन मात्राद्यनुकर्षः प्र कथं ग्रहणमतो वार्तिकस्याघामवतारणिकां सोपस्कारामाह। नन्वेवमपीति। वत्विति। येन मात्राद्यनुकर्षः प्र थमश्चेत्साद्देर्ध्यवस्यापकस्यात्रापि प्रवृत्त्यानाऽव्यवस्थेति भावः। यावतीवृद्धिरिति पाठः। इदं चोन्मानं। वृद्धेरूर्ध्वदे थमश्चेत्सादेर्ध्यवस्यापकस्यात्रापि प्रवृत्त्यानाऽव्यवस्थेति भावः। यावतीवृद्धिरिति पाठः। इदं चोन्मानं। वृद्धेरूर्ध्वदे णायाअपि सत्वेनोन्मानतानुत्रिविधेति। प्रमाणपरिमाणोन्मानेत्यर्थः। भावः सिद्धश्चेति। चेनार्थं वैशेष्यमात्रा

= अन्येतु यत्संख्याकोवद्धिसंज्ञको वर्णइत्यर्थः। तथाचवृद्धिमितिजन्ये
= तिसूत्रेरैरवरे प्रयुज्यते। यथा वद्धिं प्रतिफलोपधातेत्यादि। यावंतः
= रलोकाइतिवत्। एवं हि वस्यमाणं त्रैविध्यमप्यांजस्येनसंख्याप्राप्त
= यत्संगतमन्यथासंख्यो दाहरणात्यागोनिबीजः स्यात्पूर्वपादमाशात्यागेबी

जंतु यथा काकोचिह पञ्चादिविनाशकतुन्दिकरुदक्षं:=
माकाज्ञाकाशिगतिनाकुरुकाकोदाहरः रां:अतरः=
वंशशिगरसूक्तमिकाकेवंतुर्भुद्धिरुतानकाठेघ=
भ्रुक्तोजरताको छ्य२=

घमनिधानयोः संग्रहः। न च वचनेन मात्राघमनिधानः सिद्ध इति वाच्यं सर्वनोमानोपाधावनिष्टस्य मात्र च अ-
प्स्यानथान्यासस्य कर्तुमशक्यत्वादिति भावः। नरूपीति। नावच्छेदकं प्रकृतिभूततच्छब्दार्थरूपमपीत्यर्थः
।अन्यथा। एकविषयत्वेपि प्रत्ययपरंपरायां। परिमाणग्रहणेन तु तस्य सर्वनोमानपरत्वात्प्रमाणग्रहणानु-
वृत्त्या न तदर्थसिद्धिः विषयभेदान् तन्मात्रमित्यादौ मात्राघसन्निरपि सिद्धा। अर्थभेदे न उत्तवत्वं तान्मात्राघस-
न्निरपि सिद्धा। यावद्विषयभेदं च प्रत्यययोत्पत्तिः। विषयैक्ये तु न लघुना सिद्धो न कर्मधारयान्मत्वर्थीय इत्येतन्मू-
लभूतगौरवेणानुत्पत्तेरित्यलं। परस्मिन्प्रत्यये। प्रत्ययसंज्ञके। परस्मिन्प्रत्ययेऽणि न द्विषयेऽज्ञाने चा प्रकृतिः प्रत्यय-
स्य प्रकृतिर्मीयाच। तत्संबंधिनि प्राकृते। प्रत्येकं वलंपदं। प्रत्यरूपं। पदसंज्ञं च। इयत्। परिच्छेद्यं। इयदित्येतत्। मिमी

शा०र०

ने। जानाति। औपनिषदाः। वेदांतिनः। संख्यायाः परिमाणमिति। करणस्य कर्तृत्वविवक्षया षष्ठी। परिच्छेद इति।
भावसाधनः परिमाणशब्द इति भावः। तस्मिन्कर्तव्ये यः प्रश्न इति। यावत्परिच्छेदकसंख्याप्रश्नेपि परिच्छेदस्य वि- ×तद्विषयः प्रश्न इति २
षयत्वात्संख्यापरिच्छेदविषये प्रश्ने किमो वर्तमानत्वं बोध्यं। करणत्वनीयां तेन साधनं कृतेति समास इत्यपि वक्तुं
शक्यं। केषामेषामिति। नात्र परिच्छेदकत्वेन संख्या विवक्षिता। एतेन संख्यायाः परिच्छेदकत्वाव्यभिचारात्परि-
माणग्रहणं व्यर्थमित्यपास्तं। कृत्स्नात्र किमर्थमत आह। अत्र नानामिति। बाध्यत्वादिति। सतिशिष्टत्वेन आ-
द्युदात्तस्य बाधकत्वाच्चेत्यपि बोध्यं। एकत्रिंशमिति। एकत्रिंशदादयः संख्याविशेषा एव न संख्यासमुदाय-
रूपा इति भावः। अत एव नानादिति सूत्रे ऽसंख्यादेरिति चरितार्थं। इहतस्यादिति। विंशसंज्ञो व्यपदेशिवद्भा-

८९

वरुष्पते। अचः परस्मिन्निति सूत्रे विंशंशा नमिति भाष्योदाहरणात्। अवयवः प्रत्ययार्थ इति। वार्क्षीशाखे
ति वदिति भावः। अहृ नि निमित्तस्यैवेति। तत्सहचरितधर्मस्याप्युपलक्षणं। तथेहापीति। नैकादशानांघटानां ×नैर
पूरणं तलमित्यत्र न। पदशायस्त त्सं रव्यापूरकत्वेन विवक्षित त्स्तदासमत्स्ययार्थः। नदाह। एवं चेति। चरमेगत्स्प
नेइति। अनेन तस्य तत्वेन षिवक्षार्हशिना संमम्येति। पुक सूत्रे भाष्ये तु सह विधानमुक्तं। य इत्विति। य इच
छंहसीत्यतो ऽनुवृत्येति भावः। पूर्वसूत्रेंतं तादिति सूत्रेप्युगे वास्त्विति पाठः। मनस्येति। उत्तराचूसहितस्येति
शेषः। आदेरवइति। व्यंजनसहितस्येति शेषः। नन्वत्र व्यंजन सहिता च एवाक्षरत्वव्यवहारेणेह न त्वासः
कुतो ऽत आह। विशेषणत्वादि। द्वितीयेतीति। विभाषा द्वितीयान्तं तीयेति निर्देशादित्यर्थः। उआदेशत्वेनत्र

ग्रा०१०

उ॰।प्रसंगः। द्विशः शादेशात्तेनु नरस्य त्वणप्रसंग इति भावः। निपातितात् इति। निपातनार्थं पठितात् इत्यर्थः। एवं लो
कप्रसिद्धा इत्यस्य प्रसिद्धतया लोके व्यवह्रियमाणा इत्यर्थः। भाष्यमत्र मिति। भाष्ये षष्ठ्यादेश्चेति सूत्रस्य संख्या
देरित्यस्यैकशेषे प्रयोजनमुक्त्वा नरूं नविध्यभावात्स्यामित्युक्त्वा इदमेव ज्ञापकमेतन्नकरणेन रूं नविधेस्तेने ×नै३
कविंशति सिद्धमित्युक्तं। लौकिकग्रहणेन तु नरसंगतिः स्पष्टैवा अयमेव निषेधो ग्रहणवत्त्वस्य प्रत्ययविधि
विषयत्वे मानमिति तदाशयः। नैतत्सिध्येदिति। सहस्रादिस्तत्र मतुप् नेति रित्यपि बोध्यं। किंशा नादिग्रहणेनेति ×भ्य५
। न च सहस्रादि संग्रहार्थं उत्तरसूत्रेपि पंक्त्यादि सूत्रस्य षष्ठ्यादीनामेव ग्रहादिति वाच्यं। एवमपि शतग्रहण
स्यैवैयर्थ्यापत्तिरित्यभिमानात्। संख्याद्यर्थमिति। सहस्रादिसंग्रहार्थं तदावश्यकमित्यपि बोध्यं। निषेधादि

नि।एतदुपपादितं।क्रियाविशेषणाभ्यामिति।लौकिकविग्रहवाक्याभिप्रायेण बोध्यं।द्वितीयायां प्राप्तायामि
ति।इदमर्वाचामनुरोधेन यदि तु कर्तृकर्मणोः कृतिअनभिहित इति सूत्रस्य भाष्यप्रामाण्यादधिकरणार्थस्य
गुणानामार्थत्वेनाक्षिप्तत्वं।तदा षष्ठ्यां प्राप्तायामिति बोध्यं।तत्राधिकपदार्थेन योर्भेदान्वयस्यैवानुभवात् प
क्षपवादभूत एवैमेतत्वं तत्रमथमापवादभूत इति बोध्यं।समस्याविति।तदस्मिन्नित्यत्रोपश्लिष्टपदाध्याहारात्त
सप्तमी।तिभाष्यारूढो मार्गः।अभिहितत्वादिति।इदमध्यारूढारवारीशेरोनेत्यभिप्रायकं।अधिकारवारीत्यत्रतु
सामानाधिकरण्यात्प्रथमा शेषेणेति हेतौ तृतीयेति भाष्यानुसारेण युक्तं।तस्यार्थ इति।साधनस्यैव प्राधा
न्यानुभवात्।प्राकरे सह शब्दः साहित्यमात्रवाचीति भावः।गौणे।तादृशोपायदंभयोः।नेष्यत इति।अनभिधा

गृ॰ ९॰

नादिनिभावः। इतिकृताचेति। तावन्नियेनेति वार्तिके षष्ठेन रूपेण गृह्णाति पक्षे इत्युदाहरणभाष्यतो■प्येवमेव
लभ्यते। न चोदाहरणे पूरणप्रत्ययस्यैव लुको दर्शनात्। किंच कनो लुग्वक्तुमशक्यः। सहविधानेन वाक्यभेदेमा
नाभावेन चोद्देश्यत्वानुपपत्तेः। नन्वनेन इति। अनेन भाष्यविरोधाद्वार्तिकमतमनादेयमिति सूचितं। अथभुक्त
इति। अद्य श्राद्धभोजनेन कृत इत्यर्थः। गो पदादिनिर्माणानामुपलक्षणं। गवामित्यस्य पदविशेषणत्वेपि नित्यसा
पेक्षत्वान्न दोषः। तेन हिरण्यादाविति। एतेनान्येष्वशब्दात्प्रत्ययस्य च शब्दस्य पदादेशोऽविद्यमानप्रकृतिप्र
त्ययमेव वान्येष्वरिनिपातनमित्यपास्तं। हिरण्यपाद्यन्येष्वर्थेपि नदापत्तेः। तस्यार्थे क्षेत्र इति सस्य निर्माणप्रकृते
क्षेत्रे इत्यर्थः। अविवक्षित इति। तयोः प्रमातिक्रमे कारणाभावेन प्रकृत्यानिर्देशेन शास्त्रासंकोचे मानाभावादिति

भावः अत एवाह मत्वर्थस्य सत्वर्थेम ह्यनिति सिध्यति॥ विवक्षित एवेति। अत एव गवामनीनत्वे भागनत्वे वा मतुपो
न साधुत्वमिति भावः स्पष्टं चेदं सर्वं भाष्ये॥ सप्तशब्देनापीति। बहुवादिशब्देनापीत्यर्थः सहस्रगोरिति बहुव्रीहिः
राज्ञो विशेषणं॥ सहस्रगोभिरित्यपपाठः॥ संज्ञाभावेन समासस्यैवोल्लंभ्यात्॥ रुजायपत्तेश्च॥ उभ्यनेइति। इउदृप
दैतेत्यर्थः नत्विति। अत एवा व्यतिरेकात्सिद्धमिति भाष्ये संगच्छते॥ चूडावान् वृक्षइत्यत्र वृक्षो वयादिः। नत्वहि
ति। अत एव भाष्येऽत्रैव सत्येन ह्यार्त्तिकोक्तिः॥ स्थितमाक्रे इति नेच घुड्भ्यांम ह्रस्वस्य नित्यत्वार्थं नत्। विक
ल्पात्तु भाष्यपाठ तस्य हि। नित्यत्वं न्याय्यमिति वा च्यानेषां रूढिशब्दत्वेन तदर्थस्य मतुपाऽभिधातुमशक्यत्वे
न तस्य नित्यत्व सिद्धेः। घुड्भ्यांमो नेत्येव सिद्धेश्च उत्वादादेशादृति अन्यथा मत्वपत्वभ्रमः स्यादिति भावः।

ग्रा०२०

ंनोद्यानमितिप्रत्ययोलक्षिभावः तत्र ध्वनयन्नाह मल्विति॰ विमादिकाल इति॰ यद्यपि ज्योत्स्नात्स्नादिभ्योऽण
उपसंख्यानमिति [illegible] वा[illegible]र्त्तिकभाष्ययोर्वैयादिक इत्युदाहरणं॰ तथापि कौलसाहचर्यात्तन्त्रहोर्यकमेवे
ति वृत्त्याद्याशय इति भावः यद्यपि [illegible] त्यादिकृत्तोस्य स्वं॰ महत्पलालमिति द्वन्द्वमादृशीकारानुरोधेन [illegible]
भिन्नानि शालिकोद्रव पलालानि पलालीनि कैयटः प [illegible] लालक्षोद इत्यस्मै॰ नानागतानीति नानाप्रकार
णीत्यर्थः इति वदितिद्वन्द्वं कैयटानुरोधेन यदि कृत [illegible]
पूर्वीत्यादौ कृदन्तमात्रग्रहणात्पानोपस्थितिरिह [illegible] लस्स्येवेत्यनेन तद्दोषक्षेवेतिवाध्यं कर्त्व्युत्पन्नग्रहणशङ्का
त्तन्त्राद्यणि सिद्धे किमत्र भग्नाग्रहणेनेत्यत आह भगादिभ्यस्त्वेति विच्छिन्नस्येति। यस्यइत्यलाभाहेर्विच्छिन्न

स्यापिप्रतिविधानं पुनः संधानं भवतिसादृतिरित्यर्थ इति संग्रहाय। अत्रं नत्वादिति। अहं नत्वादित्यस्या

प्युपलक्षणमेतत्। नवं मः समूहेः नत्वरां नमिति तमोस्तस्यांसेत्यर्थः लाक्ष णिकाइति निम्नोन्नतरूपेर्थेवा

क्ष णिका इत्यर्थः ईरिणः पांसवः स्मारमत्कणा इत्यर्थः कुर्दस इति वृक्षादेववीजद्वाराद्दृक्षांतरोत्पत्तेरिति

भावः अन्येतु शाखेत्याहुः अनभिधानादिति। अतएव भाष्येऽनइत्यनुक्तावेकगविकोनसिध्यती ... साशा

स्पसमासांतेनकृतेभविष्यतीतिसमाहितं। अन्यथा वहुव्रीहौ नदृसिध्यानदसंगतिः स्पष्टैव। अर्वाचामनुसारे

णाह। अनइत्येवेत्यादि। भाष्याभिप्रायेति। वस्तुतोभाष्याभिप्रायवर्णनारूपत्वादनइत्यस्यनिवृत्तिरेवोचिता। गो

विंतिरेकविंशतिरस्यास्तीत्यादौ त्वनभिधानान्न। किंवानुवृत्तौ गोशकरिकोनसिध्यति। शकटशब्देन दृत्तौ सिद्धव

शा०र०

पिशाकदिशब्देन वृत्तौ गोशकटिमानित्यस्यापत्तेरिति महकृतसूत्रभाष्येस्पष्टमुक्तत्वात्। पक्षांतरमिति। अथवामत्वं ×का १
तान्मत्वर्थे। योलुप्यत इत्यनेनावयवधर्मस्य समुदाये उपचारमाह। इह तु मुख्येर्थे वत्वे संभवति उपचरितस्या
श्रयो न युक्त इति कैयटे उक्तं। आनङित्यनुवर्त्तेति। इदं चिंत्यं। आनङित्यनुवृत्तौ यदि एकगोपूर्वाद्याकारांतादित्यर्थ ×व ३
स्तर्हि सेकशतिकासिद्धिः। एकगोपूर्वाद्याकारांताच्चेत्यर्थे अन्याकारांतेभ्योपि ठञापत्तिरिति दिक्। ततो निष्पन्न ×ति ४
मिति। दीनारादिष्वविशेषः। न्यासकार इति। कर्मणि क्तमत्वर्थे उपचारं विना पि निर्वाह इत्यरुचिः। तत्र। एक
गोपूर्वादिति सूत्रे। भाष्योदाहरणादिति। महत्कृत्स्यैकाजिति सूत्रे खरवतर इति भाष्योदाहरणाच्चेत्यपि बोध्यं।
इत्याहेति। कश्चिद्भाष्येप्येवमेव पाठः। आयुधानः स्यादिति। पर्वतशब्दे तु न विशेषः। पर्वशब्दस्य वनिबंतत्वे

८४

ननन्विषयस्येति किं इत्सूत्रेण वा घुडन्तनपानपितनिचा घुडन्तत्वात्। पर्वं धातोर न चिश्रंनो डान्तो विपर्वं नडस्तस्य
नू अपसिद्धं नादिति। दृडानिड्नं वा पुनरेनद्धविष्यनि मरुद्भिर्दृन्तो मरुन्न इति एनत्संख्यानपरभाष्यविरोधादित्य ×त्ता२
र्थः मरुच्छब्दस्योपसर्गत्वविधानसामर्थ्यादजंतत्वाभावेप्य च उपसर्गादिति नत्वं मरुत्तः मरुच्छब्दश्चांतोदा
×त्ती४ नदनिं याकर्मणीति पूर्वपदप्रकृतिस्वरेण मरुत्तो मध्योदात्त इति फलाभेदाया चापि पिसाठ एव। उपसर्गश्चाभि
वर्जमिति नि मरुत न आघुडन्तत्वं तु न। नत्वे एवोपसर्गत्वस्वीकारादिति भावः। नदेड्डनयत्वाह। स्यादेतदित्यादिना।
अव्ययत्वं स्यादिति। नथा च मरुद्भिर्दृन्न इति भाष्यप्रयोगे विभक्तिश्रवणानापत्तिरिति भावः। उनरमितिं अनए
×ध्ता१ वनत्ववन्तानि भाष्ये नोदाहृतानि। नत्वविंनि। अनएवोपसर्गाश्चेभिवर्जमिति किं इत्स्वरोपि न मरुच्छब्दस्या।स

शा०२०

श्मेवपित्वमाहेति।नसख्येमध्योदात्तत्वेननिर्वेत्र [illegible] फलमेदापत्तेरिति भावः।उत्करीत्या।प्रथमशेषस्य हरदत्तरी
त्या।मास्त्विति।निपातनत्वमसुक्ताद्युदात्तत्वस्यैवेवादिपाठेनबाधात्।परेतु नत्वविधावेवमरुन उपसंख्यानेनसिद्धमथये
संज्ञाप्रकरणेपाठेनेकसंज्ञालाभाय।एवंचनिपातनत्वमूलमाद्युदात्तत्वंदुर्वारंतच्चोपसर्गत्वादिश्चानभिधानस्वा
भाव्यात्तत्वविषयएवेतिमरुद्धिर्दत इत्युपपद्यते।तस्मात्त्रिता ठ ए वोचित इत्याहुः।इतिमंत्र इति।एतन्मंत्रघटका
भिन्नार्थ इत्यर्थः।एतद्धितिविषयकमिति।तेननातिप्रसंगः।इत्सुजिति।नचविशेषविहितभमत्वयेनबाधः।बलादिभ्य
इतिसूत्रार्थाधिकाराश्रयणेनविकल्पार्थकान्यतरस्यांग्रहणानुवृत्तेः।तुंदादिसूत्रेचेनेनिठनोःसमुच्चयार्थान्यत
रस्यांग्रहणानुवृत्तेस्तेषांविधानान्नेव्यत्रबोध्याः। ।इतिमत्वर्थीयाः। ।सार्वविभक्तिकः।आद्यादित्वात्।तसेश्चेति।आद्यादि

भ्यः किं सर्वनामबहुभ्यः परस्य तसेस्तसिलादेशा इति तदर्थः। इत्यादिकमिति। नेपुतनेत्यत्रैत्वमादिशब्दार्थः। नेहेति। अ
नलकार इत्यर्थः उकारेणेति। सहितन्द्रर्थं चरितार्थत्वेनेत्संज्ञयानिवर्तनेन। णौ गमिरित्यादौ लिकानिर्देशः। गमेरिउति
वत् धातुस्वरूपभंगभियानूपधालोपोन। उच्चारणार्थानामपीत्संज्ञायास्तस्य लोप इति सूत्रे भाष्ये स्पष्टमुक्तत्वादि
ति दिक्। इदमिति। छांदसमपीदमित्यर्थः। इति कारस्त्वाहेति। भाष्योक्तयोर्द्वयोः पक्षयोर्मध्ये ऽमुमेवाद्दरेणाहेत्यर्थः।
अनभिधानादिति। अन्यथा सर्वथैत्यादौ नदमतीतिः। यथा हरिरित्यादौ यत्सदृशो हरिस्तत्प्रकारवान्हर इति बोधा
पत्तेः हरिसदृशो हर इति बोधानापत्तेश्चासिद्धांतेनुपपत्त्प्रकारवान्हरिस्तत्प्रकारवान्हर इति शाब्दबोधे द्वन्ते सबोधः
फलनीति बोध्यं। तथा ज्ञानीयइति। यद्विथालपिप्रकारवति स्यान्नदा ज्ञानीयो पादानं त्वर्थे स्यादिति भावः। आगिरि

शु०१०

यानांपूर्णोवधिः विधात्रा इत्येति। इदं ह्रस्वाद्यनुरोधेनेतिबोध्यं। विधयुक्तगतान्यश्चमकारेभवंतीतिभाष्यंविधानंवि
धइतिघञर्थेपुंल्लिंगइतिकैयटः। विधशब्दस्यार्थेइतिसमासः। एवंचैकागोविधेसत्त्रमसक्तिरेवना। मकारइ
ति। सामान्यस्यभेदकोविशेषइत्यर्थः। अनिसतितिविति। अत्रभागेकादशाम्यइत्यस्याप्तिः। अतएवविभाषाद्वि
तीयेतिसूत्रमत्याख्यानंभाष्यकृतोक्तंसंगच्छते इत्यत्रैवेति ततःभागित्यर्थः। इतिभावइति। एतद्भाष्येनदृष्टं।
प्राधान्यादिति। नहिशेषणमितिशेषः एवंचस्वार्थिकमकरणाविरोधोभवतीतिषष्ठ्याएवविशेषणंन्याय्यं।
भूतपूर्वसंबंधेयावद्वीनदंतादित्यर्थउचितइत्यन्ये। शेषेल्युडिति। सचकर्तरिबाहुलकात् इतिभाष्यस्वरसः॥
भावेइत्यन्ये अबाधकान्यपीति। इदंह्रस्वानुरोधेन बाधकान्येवेतिसर्वादिसूत्रेभाष्यात्। एवंचह्रस्वोऽसाधुरे

वा। अभिभवइति। स्वापेक्षयेनरस्य न्यूनीकरणमित्यर्थः। सकर्मकइति। अनएवभाष्येकर्तरिल्युट्। अतिशायनस्यप्र
त्ययार्थत्वपक्षेकालीमतिशेतेकालः कालितरइतिप्राप्नोति कालतरइतिचेष्यतेइतिहितीयं नात्मस्यपापादनंकृतं
तथाहिसतीति। भावल्युटं नत्वेषपक्षेदोषः। किंत्विति। अनेनकर्तृल्युटं ननाध्वनितम्। अतिशायकर्तरिवर्तमाना
त्प्रातिपदिकात्स्वार्थेप्रत्ययइतिसूत्रार्थः। अतिशायविशिष्टार्थवृत्तेरित्यस्यनत्कर्तृकरूपार्थवृत्तेरित्यर्थः। अति
शायोविवक्षितइति अन्तरंगत्वेनपूर्वोपदं पदान्तरेणान्वेतीति प्रत्ययस्य चस्वार्थद्रव्यलिंगसंख्याकारकप्रयुक्तकार्य
लाभोनरमित्यर्थस्तदाह। विप्रकृष्टं नरइति। इत्याहुरिति। अतएवगरीयांसंप्रलम्भारम्भतइतिभाष्यप्रयोगः संगच्छ
ते। नन्विहद्विवचनमिति। नतुरूपेद्विवचनश्रवइतिभावः। तेनास्माकं चदेवदत्तस्यचदेवदत्तयोः अभिरूपतरइतिसिद्धं। अस्म

ग्रा०र०

द्रोद्दयोश्चेत्यनेकस्मिन्नर्थे बहुत्ववद्भावविधानात्तच्चस्वनिमित्तकशास्त्रीयकार्यप्रवर्तकोनत्वेकनिमित्त
कनिवर्तकः नचद्वंद्वोष्ठस्यद्वंद्वाः स्निग्धतराइतिनसिध्येत्समाहारस्यैकत्वानुवर्तिपदार्थानांबहुत्वादिति
वाच्यं। द्वंद्वोविशेषणेषु संख्यानुपादाद्वंद्वोष्ठलक्षणवर्तिपदार्थद्वयप्रतिपादकत्वेनाक्षतेः। सन्निपातस्यत
इति। अपादानेइतिशेषः दुर्वारत्वादिति। तत्स्वस्वाभावाचेत्यपिबोध्यं। सूत्रे अनुत्पादनादिति। हर्यादिभिरितिशे
षः विभज्जनीये। विभागावधौ नच। उपपदं च। नावश्यकमिति। प्रकरणादिनानिर्णयादितिभावः। इष्टत्वइति =वीहा ३
। अत्राप्यतिशापनइत्यनुवृत्तेर्नियमत्वसंभवस्तेन विनापीतिभावः नत्वपूर्वइति गौरवादितिभावः अस्यार्थ
स्यस्फुटंप्रतिपत्तयेछांदसमप्यत्रव्याख्यानं। निवृत्तेति अनुत्पन्नएवेत्यर्थः षत्वजश्त्वयोरपिनिवृत्तिरिति

७

।सपादसप्ताध्यायीस्थकार्यप्रवृत्तियोग्यतयाऽप्रवृत्तिः। नदेवाह। प्रागेव तयोरप्रवृत्तिरिति। श्रौव्यादिति। एभ्यः प
रत्वात्सपादसप्ताध्यायीस्थत्वाच्चेत्यपि बोध्यं। तुरिति। तुरिष्ठेमेयस्स्विति सूत्रमित्यर्थः। तस्य छांदसत्वं तु निमित्तभू
तेष्ठनीयसुनोश्छांदसत्वादिति बोध्यं तुश्छंदसीत्यस्येष्ठनि परतः पूर्वकार्यत्वाभावेन णावतिदेशाभावात्तु दृढिष्ठे
श्चेति नच तद्ग्रहणसामर्थ्यात्स्थ्वादेराकृतिगणत्वेन मनित्विवर्षिमेतीति वाच्यं। वर्षादेशस्य चारितार्थ्येन ष्ठ
नि ज्यादेशेन बाधापत्तौ वर्षिष्ठइत्याद्यनापत्तेः स्पष्टार्थमिति नहि स्थिष्ठइ कोसंभवादिवस्सेपि ष्ठादौ मत्ययस्येकश्चस्य
वधानादप्राप्तिशंकाया वारणार्थं पूर्वमात्रस्येत्यर्थकं न दितिभावः। अनंत्यत्वाच्चेति। इक्परिभाषोपस्थित्या पकारद
कारयोर्न गुण इति भावः। औत्सर्गिकत्वादिति। संख्यायास्त्वनेकत्वेपि एकवचनमिति योगविभागादिति भावः

श्रा०र०

।भंगमेवाह। त्यक्त्वाप इति। वैषम्येति। तन्मूलकृताशाकृशा वृद्धस्यैव मयोगादिति भावः। शाकलत्वात्प्रत्ययस्य पूर्वदेशा
त्वं पुरस्तादेवेति। पुरस्ताच्छब्दात्कृत्स्यैतदर्थलाभः। अभिधेयवदेवेति नतु प्रकृतिवदित्यर्थः तेन प्रकृतिलिंगाद्यति
क्रमो न प्राप्नुत इति नात्पर्यं। सुप इति चेति। क्वचित्प्रातिपदिकस्य टेर्ग्रहणं क्वचित्सुबंतस्य टेरित्यर्थलाभार्थमुभयोर
नुवृत्तिरिति बोध्यं। अविशेषेणेति। विशेषाभावेनेत्यर्थः। ननु सुबंतस्येति। अन्न एवकारादेशः साकच्कार्थः कोके इसे ×भवन्नयंवकस्यः क४
वमर्थ इति भाष्यं संगच्छते। हरदृइति। अत्रारुचिस्त्वभाषितपुंस्काच्चेति विकल्पात्पक्षे इत्वाभावः सुलभ इति। कस्येति। नक
स्यापीत्यर्थः। हरदत्त इति। अत्रारुचिस्तु योगविभागसामर्थ्याद् इदृचरइत्यस्यात्र संबंधस्तेनाव हृचोप्येतौ न नः कठ
चं सिद्ध्यर्थं च चकार इति हृस्यास्थापयइति। यस्मिन्विधिरिति। प्रत्याप्रस्योपस्थितप्रकृतप्रत्ययस्य विशेष्यस्य सत्वा

दितिभावः। औपदेशिकमतिप्रसक्त्यर्थं तु नादिग्रहणं। ग्रहणवैयर्थ्यशंकापरभाष्यासंगतेः। भवस्यापामिति। मि
त्यत्वादिति भावः। कादेशार्थमिति। न च शौवस्तिकसिद्ध्येऽठ चश्चित्त्वेन सामान्यापेक्षज्ञापकेन सर्वत्र नः पूर्वमिकादेशा
पत्तिरिति वाच्यं। साक्षादनुक्त्या ज्ञापकसिद्धस्यासार्वत्रिकत्वेन नस्येनद्विषयेऽप्रवृत्तेः। सर्वरीत्या फलांतरमपि संभव
नीत्याह। किं चेति। असंभवेनेति। कादेशेन बाधादिति भावः। नन्वर्थमपीति। तत्रापि कादेशात्पूर्वं नित्यत्वाल्लोपे इका ×नि४
देशे चित्रिकङ्निरूपसिद्धिरिति भावः। सेमप एवेति। एकारश्रवणापत्तेरिति भावः। अकृतव्यूहपरिभाषयेति। यदि गुणो
नस्यान् न हि कारादेर्लोपः स्यादिति गुणनिमित्तविनाशासंभावनासत्त्वादिति भावः। ज्ञापकस्य। अकृतसंधेरित्यस्य
।विशेषपरत्वादिति। अस्यार्थिकमत्ययविषयत्वादित्यर्थः। दिग्गर्थस्तु नेंद्रस्य परस्येति ज्ञापकेन पूर्वोत्तरपदनिमि

शृ·र·

नकार्यापेक्षयां नरंगस्याप्येकादेशस्य पूर्वमप्रवृत्तेर्न दोष इति। इको दाहरणमिति। अत एव नामपदं च रितार्थं
। अकृतव्यूहपरिभाषयेति। अस्य यद्यपीत्यादिः। इदमुपलक्षणं। इकादेशपर्यंतं नत्वसपादसप्ताध्यायीस्थका
र्यप्रवृत्तियोग्यतया कृत्वा घप्रवृत्तिरित्यपि बोध्यं। यस्येतिलोप इति। अस्य सिध्यति तथापीति शेषः। इकं निमित्तीकृत्य
चांते भसंज्ञासत्वात्कृत्वा घप्रवृत्त्यानत्तसिद्धिरिति भावः। स्थानिवत्वादिति। नचास्यापि स्थानिवद्भावस्य परं परत्वाप
दांतविधिमापकतया मत्वेपि नपदांतेति स्थानिवत्वनिषेध इति वाच्यं षडुकेपि दोषापत्तेः। यदि तु द्वितीयाचतुर्थ्यं श्रूय
माणस्य लोपविधायकवचनमाणपाद्भत्वे स्थानिवत्त्वं नहिं प्रवृत्तेपि तुल्यं। इष्ट नेइति। एतच्च स्थानिद्विषितिसूत्रे भा
ष्ये स्पष्टं। एवं चैकाक्षरपूर्वपदानामिति वार्तिकं षष्ठ्यांतिरिक्तविषयकमिति भावः। धर्मानराणां। चापलादीनां

२९

अश्वेनाश्वायामुत्पन्नत्वादीनां च कयोरन्यतर इत्यादि। इत्यर्थेकतरोन्यपयोरित्यादिप्रयोगः स्यादिति भावः। एक
स्येति किमिति। द्वयोर्मध्ये एकस्यैव निर्द्धारणादिति प्रश्नः। कर्मणीति। द्विकर्मके निर्द्धारण इत्यर्थः स्यान्न हेति भावः। इ
तत्रापीति। अपिरेवार्थे अत्रैव स्यादिति अर्थः नत्वेकनिर्द्धारण इति भावः। उत्तमच [illegible] इष्टत्वादिति। अत ए
वकतरकतमाविति सूत्रे जातिपरिप्रश्नग्रहणं सार्थकं। नच कतरशब्दार्थे। कतमसाहचर्येणोपपत्तेः। अत एव कत
मा कतमे षामाध्यने निर्द्धारणप्रकरणे उत्तमे भाष्यप्रयोगः संगच्छते। इष्टत्वादिति। बहुषासीनेषु कश्चित्कं चित्पृच्छति कतरो दे ×२०३
वदत्त इति प्रत्यय इति सूत्रे भाष्यप्रयोगादिति भावः। इति वनकर्तव्यमिति जातिग्रहणाकर्तव्यत्वे तात्पर्यं। परिप्र
श्नग्रहणं तु स्पष्टार्थेनिवृत्तये आवश्यकमिति बोध्यं। आकर इतीति। पूर्वसूत्रस्य द्वयोरित्यस्य प्रत्याख्यानभाष्य

सू०८९०

व्याख्यावसरे कैयट इत्यर्थः। अनुवृत्तेरुक्तत्वादिति। अत एवाव्यक्षेपणाद् इति सूत्रे एकत्वयोरर्थयोर्विशेष इति भा
ष्यप्रयोगः संगच्छते। तमादृत्य भागवृत्तिप्रणेतानो नित्या इति तु प्रायिकमिति भावः। ।आगिवीयानां पूर्णो वधिः। ।
नागौरवान्। सर्वमिति। एवं च द्वित्वेऽजादिभत्वयस्य निमित्तत्वे ऽचोपि निमित्तत्वं यण्यचो निमित्तत्वे न हादिभस्य यस्यापीति
भावः नद्वावेति। तस्मिन्सति तद्भवतीत्येतावता निमित्तत्वं न तु तत्प्रयोजकत्वेनेति भावः। पद्यन्तस्यानिवर्तनं
स्यात्स्यादेव तस्य द्वित्वमिति कार्यनिके चगत्यने इत्यपि बोध्यमिति सम्यगुक्तोरित्यत्र भाष्ये स्पष्टं। इतिनैवेति। ज्ञापक
स्य सजातीयापेक्षत्वेनेत्यपि बोध्यं कार्यित्वलाभादिति। तथा च तस्यैव निमित्ततया नाश्रयणमिति भावः। द्विती
याजवधिकस्येति। तयभाष्यीवद्यंजनानीति तद्वधिकस्य द्वित्वमिति षाष्ठभाष्योक्तेरिति भावः। द्वित्वनिमित्तत्वा

पा०१०
२९

भावादिति। न च यङि परत ईत्वमिति तन्निमित्तस्य यङो विशिष्टस्य ङित्वनिमित्तत्वमस्त्येव। अवयवस्य कार्यित्वेपि न तस्य
त्वं प्रति निमित्तत्वं न हि कार्यी निमित्तत्वेनेत्यत्रापि यथा कथंचिन्निमित्तत्वं कार्यित्वं च गृह्यत इत्यत्र मानमस्ति जेघ्रीयः।
त इत्यादेः मस्तूदाहरणं परभाष्यप्रामाण्येन तत्र निमित्तकार्यिपदयोर्मुख्यार्थत्वस्यैवांगीकारादिति वाच्यं। अरिरिष
तीत्यस्याप्यसिद्धेः न हि तत्र गुणनिमित्तस्यार्धधातुकसंज्ञस्य सशब्दस्याकारविशिष्टस्य ङित्वमस्ति कार्यित्वं। शपि
तरीत्यत्रापि ऋकारस्यैव कार्यित्वे तज्ज्ञापकस्य शिथिलत्वापत्तेश्च। यदि तत्रेगन्तांगस्येत्यर्थात्सर्वस्य कार्यित्वं तर्हि
त्रापि यङन्तस्य ङित्वमित्यर्थात्तुल्यं। तस्मान्न हि कार्यीत्यत्रापि यथा कथंचिन्निमित्तत्वादि गृह्यत इति युक्तं। अचीति
नित्यर्थमित्यर्थमित्यस्य जेघ्रीयत इत्याद्यर्थमित्यर्थः। आधिजगे इति तु प्रयोजनं न गाङ्लिटीत्यात्। वृद्धिलकारकति

२९

ईशाश्रयणात्तस्य तावस्थायां प्रवृत्तेः न च तस्य विषयसप्तमीत्वांगीकारेण नैमित्तिकत्वं तद्भावभावितामात्रेणो
वत्तद्बुद्धिभावाभावितामात्रेणापि निमित्तत्वस्य युक्तत्वाद् अत्र सूत्रोपात्तलिड्बुद्धिभाव एव निमित्तमित्यत्र निमित्तता
भावः सर्वत्रैव चात्र शास्त्रे बुद्धिकृतमेव निमित्तमिति स्फ्वृद्धिगो ल्युगिति सूत्रे मनोरमायां। अत एवांगाधिकारे आर्द्ध
धातुक इत्यादीनां विषयसप्तमीत्वेपि परदेशस्थविषयकबुद्धिभावेन जायमानतया परनिमित्तत्वेन तद्विघयचः परस्मि
न्निति निस्थानिवत्त्वप्रवृत्तिः। इदमेवाचीति ईदृशनिमित्तत्वाश्रयणे लिंगं ध्वनितं चेदं प्रकृतसूत्रेऽचो यदिति सूत्रे च भा
ष्ये इत्यन्यत्र विस्तरः। निमित्ते इति द्विर्वचनेचीत्यनेन नैमित्तिभावः। पुनः संप्रसारणमिति। घुनिस्वाप्योरित्यनेनेति भा
वः। निषेधादिति। अस्य च व्यवहितेपि प्रवृत्तिरिति स्पष्टमेवाकरविदां। इदमपि प्राचामनुरोधेन। संप्रसारणप्र

मा०र०
२२

हणसामर्थ्यादेकवर्णव्यवधाने पून इत्यादावस्तुप्रवृत्तिः। प्रवृत्ते नप्रवृत्तौ तु नमानमिति न कुंशाकपलात्। प्रत्युदाहरणं न
रत्वमन्यत्रोक्तं। रूपातिदेशो नि। न चात्र पक्षे द्वित्वात्पूर्वमियङः प्रवृत्त्या द्वित्वे कार्ये स्थानिरूपातिदेशेपि प्रसंगेन त्वेमानाभा
वेन निम्यनुरित्यसिद्धिरिति वाच्यं। आभीयत्वेन यङोऽसिध्यायणप्रवृत्तेः। संप्रत्युदात्तत्वादिति निति। न च विहितविशे
षणान्निस्तारः। धातुस्वरस्य दुर्वारत्वेनासंभावापत्तेः। अनेकाच्त्वादिति। रावंच निषेधो नस्यादिति भावः। एकाचो विहि
तस्येत्यर्थे नापीदं सुसाधं। न बलावस्थायामडिति पक्षेऽकार्षीदित्यादौ दोषः। हलि सिचो रपि स्यन्नासि न बलावस्थायामेव प्र
वृत्त्या गसंज्ञानिरपेक्षत्वेनान्तरंगत्वाद्विकरणेनरमेवाडिति प्रवृत्तेः स्यषं चेदमेकाचो द्वे इत्यत्र भाष्ये। न हि मास्त्विनिडुप
देशोनुदात्तस्यैकाच्त्वाव्यभिचारादिति भावः। नवबधिम्याहृत्यर्थं न तान्तसामर्थ्यान्नोपदेशमात्रे एकाचो ग्रहणादिति २२

वाच्यं। आद्युदात्तनिपातनेनेन सिद्धिरित्यभिमानात्। स्वरूपेणेति। शासु इति पाठात्। सूत्रे नाग्लोपीति सूत्रे उत्संज्ञकत्वेने
ति ॠदित्त्वेऽन्ननन्ह्रस्वादिनिभावः नमस्यनेइति। पाठेप्यनित्यत्वेन वारणे। अन्यथा यङ्लुगन्ते भूवाद्य इति सनाद्यन्ता
इति वा धातुत्वं न स्यात्। गणनिर्दिष्टत्वात्। अनित्यत्वे मानं च यङोवा गुणगुणो यङ्लुको रित्यादि। अत एव यङ्लुकि द्वित्व
मभ्याभावादि सिध्यति। एतन्मूलक एव यन्त्रे काच ग्रहणं किंचिदिति पाठः श्रीदित्त इति सूत्रे कैयट इत्यर्थः। अनुदात्तपाठस्य
वेति। न चानुदात्तत्वसंनोदात्तत्वबाधनार्थमित्यर्थलक्षणाये वोपपन्नौ शास्त्रबाधे मानाभावात्। सत्रकारेणेति भाष्य
कारेणैकहूतोऽरप्युपलक्षणमेतत्। एतेन बधादेशो आद्युदात्तत्वनिपातनमूलकः सदुदात्तघं नानामिवादेतानामप्य
नुदात्तोपदेशत्वाभाव बोधनात्। नच्चकथादिषु सत्वनो बधादेशो उदात्तत्वनिपातनसामर्थ्यादित्यपास्तं। यत्तु हनो वध

न्या०र०
२३

स्त्रात्रास्यमंजनानंतत्वेऽशुद्धिर्वाच्यः अदंनत्वेतुनदोषइतिभाष्येउक्तंननूपदेशेनेकाच्त्वात्प्रतिषेधाभावादिडसिद्धि
रित्येवंपरतयाकैयटेनव्याख्यानं।विहितानामिति।एवंचांगादितिनकर्तव्यमितिलाघवमितिभावः।नत्सीध्वमिति
।इणोनाद्विहितानांषीध्वमादीनामित्यर्थेषीध्वमःसाक्षाद्विध्यनासंभवःसीयुटःषत्वस्यचविधानोत्तरकालत्वा
त्।तस्मात्परस्यविहितस्यषत्वंसीयुड्योग्यतानस्येतिवाच्यं।साचयद्यपिधत्वेनस्यात्स्यादेवषत्वमितिप्रकृतेप्यस्त्येवे
त्यभिमानोनेदं।वेविषीध्वमिति।षांतमिहांगंनेणंतं।इणोनादंगादितिहि।स्वरूपकथनमिदं।इतिकेचिदिति।अ
त्राहुःचिवीजंतुभाष्येऽस्यादर्शनं।सूत्रांतरस्येनगोबलीवर्दन्यायग्रहणेचनदृष्टांतरमानमिति।इणोचेत्यपिके
चिदिति।अत्राहुःचिवीजंतुनिरंतुवंधकत्वेनसाहचर्येणचयुमिश्रणोइत्यस्यैवरुत्राविदइतिलुग्विकरणस्यैवग्र

२३

हणमुचितं। परिभाषाद्वयेन लुग्विकरणपरिभाषाया बाधात्। अत एव संतत्याम्प्यथयोर्द्धुं किंनरोष्ये सेत्वहीनव
द्गिति भट्टिः संगच्छते। छावपीति। इदं दुर्गवर्धमानादिरीत्या। अस्येति त्वखीकारेण भाष्ये निर्दिष्टारेन तङ्गृणा संभवा
त्। अत एव पञ्चविस्तारवचने इति सुणे देरिति द्वित्वाणिजभावेपि न ग्रहणं। सुधियोर्योग इति। युजसमाधावित्यस्यापि ग्र
हणं बोध्यं। विनिगमनाविरहात्। भाष्ये युजीति धात्वेकदेशोकारविशिष्टस्यैव ग्रहणं न त्विकानिर्देश इति त्वयुक्तं।
इकानिर्देशस्यैवमकर्कमानात्। विविशिषिजौहोत्यादिकरोधादिकौ। विषविप्रयोग इति क्र्यादिरपीति न्यासः। कचछ
जा इति। पूर्वार्धोपात्तानां कांतचाना इत्यादिरर्थः। उत्तरार्धे क १ च ६ का १ ण ११ ण १५ पः ११ खो २ ङो १३ ग ३ घ ४ त्रा
९० ष ११ ख २ जाः ८ इत्यर्थः। कादयः क्रमेणैकादिसंख्यापरा इति बोध्यं। ओविजीति। न चास्य इदित्वसामर्थ्यादेव से

ग्रा०र०
२७

इत्यावधारणे विजिरिति सानुबंधपाठोऽयमर्थ इति वाच्यम्। न न एवं वैवं पाठात्। अस्य हृमिति। प्रसिद्धिकरं नामग्रामग्रामा
दिवाय यथाम पाप्रसिद्धालभ्या इति। स्थापनेति। यथाल्पयास्य प्रतिष्ठाकृतेति अवस्थानमि। यथाक्कने प्रतिष्ठेति। एकः
त्रस्यापनमण्यादेः सत्रादेवी। संदर्भ इति। ग्रथ्नानामित्यर्थः। तंत्रान्तस्यादिनेति। वक्तुः तत्रेणोच्चारणं वोद्धुरान्तस्यावो
धइत्यर्थः। आदिनेकशेषावृत्ती। असंभवाच्चेति। अभ्यासादेशाहीनस्यासंभव इत्यर्थः। परादाविति। अपूर्वोपध्य
होपध्यन इति मतेनेदं यद्वास्य दिवादिपठितनणवानूपन इति शेषः तेन समानाधिक इत्यर्थः। गुणशब्देनादिति। उरण्
रपर इति सूत्रेणैकवाक्यतया ऋकारांतांगात्संस्यऋकारस्य गुणो भवतीविधानादिति भावः। तद्वयपवाकार इति
तत्रासहृद्वादिऋणामित्येव सिद्धे गुणग्रहणग्रहणसामर्थ्यात् गुणशब्देन भावितस्यानिकाचमादायलुलविषे

स्याद्वपि सत्वनिरिति भावः। अव्यवहितपरत्वमिति। पर्युदासस्य दत्राप्राप्ताहित्वाद्व्यवधानांशालाभः सैषशब्द इति स्वैषेषे
इतिद्धिः पाठए नस्य पर्युदासे मूलं। सेदृषेदृ इतिद्वयोः पाठस्तु नार्थः। प्रसंगत्तेति। तथा सति स्यादिद्वैषः। लक्षणस्याप्रयोगा
न्ययोगव्यवच्छेदकत्वस्वभावत्वादन्यथा लक्षणत्वमेव हीयेतेति भावः। आह नैवमिति। अयोगेन व्यवच्छिद्यत इति स्वा-
न्नेय इत्यर्थः। षोपदेशत्वमावेद्यते इत्यस्य न दृयोगे व्यवच्छिद्यत इत्यर्थादिति भावः। अस्यास्मानार्थमेवेति। एवं हि तत्र
भाष्यं ष्ठिवेरपि द्वितीयषकार इति सत्वे कृते ष्टुत्वेन सिद्धं तेष्ठीव्यत इति नहि न सिध्यति द्वितीयषकारकोपि स्वीक्रियते टे
ष्ठीव्यते ते ष्ठीव्यत इत्यस्यासिध्यर्थं नस्य तर्हि सत्वं प्राप्नोति। एवं तर्हि द्विषकारकः सः अघस्य सत्वे कृते ष्टुत्वेन सिद्धं ष्ठ्व-
लिट् ष्ठीवतेरत्य च न तर्हि पुरस्सज्येते एवं तर्हि यादृशि ष्ठिवुष्ठ नी इति। नादशायत्नेति। धातुद्वयपाठरूपेत्यर्थः। एकधा

248

धा०प०
२५

तुपाठेऽयोगव्यवच्छेदस्य निर्दुष्टत्वादिति भावः। आकर इति। अत्राहुरिति बीजं तु स्तौतेस्तोभसोः अरपूर्वाः इति त्रयः शेषेण
नयोः फलाभावेन पंचानामिसंसंगतमिति द्वीजं तरमाह। स्यादिति चेदिति। न च गणनिर्देशात्स्यादिष्ठिरस्यस्य यङ्लुकाश्र
मिः गणपाठ असिद्धगणनिर्देशात्स्यैवात्र ग्रहणात्। अत्र नूपसर्गात्सुनोतीति सूत्रस्थादीनां ग्रहणं। न चाभ्यासेन स्तुनि
मिनाक्षेपान्नत्र परे नियमो न चैतेन यङ्लुगन्त इति वाच्यं। सन्यङोः तस्य द्वित्वविधानेन नेनेनत्वस्य रत्वानाक्षेपानुप्यङ्लुगन्ते
भ्यासस्य द्वित्वनिमित्तत्वपरत्वासंभवेन तेन नन्वाक्षेपासंभवाच्च। नहं तत्वाक्षेपे तु दोषएव नेनेतिदिक्... रायं नइति। ना
मधातुरितिशेषः। इत्याहुरिति। अत्राहुरिति बीजं तु णिलोपे सेनित्यस्यैकाचत्वेपि आचारक्विबन्तात् यङ्लुगभिधानेनं
मानं। असिद्धवत्सूत्रस्यभाष्यविरुद्धं च न दृष्टिरिति। हरदत्त इति। नादन्त्राय यङ्लुकसत्वे ह्रस्वमानाभावोत्राहुरितिः मतांत

रमिति। अत्राहुश्चिवीजं तुगस्यार्थे षत्वप्रवृत्या नस्य चारितार्थ्येन गतिन्नार्थेस्तिपाश्रापेति निषेधबाधे मानाभाव इति। प
वस्येवेति। नयं तु विरोधान संभव एव नस्यादिति भावः। दुर इति। षत्वणत्वयोरुत्वस्यासिद्धत्वेन न द्विषयोपसर्गत्वमप्रतिषे
धपरे दुरः षत्वे निवार्णिके कृते रेफसांनस्यापि ग्रहणेन सांनयोरपि नन्निषेधात्। अत एव सुषामादिषु दुष्षुशब्दपाठ
श्चरितार्थः सत्यपदुः सुषुस्यः कुरिति दुःपूर्वकस्याधातोः कुमस्यये साधुः अन्यथा दुस्पूर्वकादेव कुमस्य यमंगीकृत्या
पसर्गादित्येव षत्वे सिद्धे नद्रुयथ्यं स्यष्टमेव। न चास्य रूढत्वेनावयवार्थाभावादुपसर्गत्वाभावः अस्य न रूढेषु निष्ठा
दिषु षत्वानापत्तेः। आर्थवत्वारोपेणोन्निचेत्यकृते पिलुल्यं दुसः यारस्तु दुरयत इत्यादौ रुत्वस्यासिद्धत्वेन लस्याभावा
र्थं दुरस्तु दुलयने इति निरूपयत्र तु रुत्वमसिद्धं निरः कुस्र इत्यादौ नञ्ञां न ग्रहणेपि नसांनग्रहणमिति भाव आवि

मू॰र॰

२६

दूर्यमिति। सामीप्यमित्यर्थः। निपातनादिति। पत्वर्थाभावेऽव्ययीभावस्य नञ्तत्पुरुषेण सह विकल्पादव्ययीभावात्ययन्
सुलभ इति। नन्वाधर्मिपरत्वेनैव दूरत्वादेनाव्ययीभावेर्थासंगतेः। धर्मपरत्वे तस्मिंस्तु षष्ठ्यर्थो वैयर्थ्यापत्तिरिति भावः। आ
धिक्यमिति। स्यादित्यभ्यासेन चेत्येतदित्यर्थः। अत्र व्यवायेपीत्यनुवर्तते। अपि नाऽव्यवायेपि। तेन येति। अत्र सेनाश
ब्दस्याव्युत्पन्नत्वेनादेशसकारणाभाव इति भावः। अवर्णो नेति। न त्वेणः परत्वाभावः। न च पूर्वत्रासिद्धत्वस्य द्वित्वे निषेधा
त्। पूर्वं धातुरुपसर्गेण निपश्यते न तु गत्वात्पूर्वं षत्वे कृते कृतेन षत्वाभावमेव द्वित्वे धिनष्ठाविस्यस्य द्वित्वे न दृश्चनेन विनापीति
वाच्यं। पूर्वं धातुः साधनेनेति पक्षस्य मुख्यत्वादिति बोध्यं। एकपदे इति। पदस्यैकत्वविवक्षणात्। अखंडैकपदेत्य
र्थः। तेन नसोमसुत्स्यनिरित्यादौ समासेपि नेति बोध्यं। उदः स्थेति। ज्ञापकात्सलादौ मत्यये एवायं लोप इत्यस्य। यथा दि

२६

रिति। म्बाद्यनुवादरूप इत्यर्थः। न च पद्यद्ये चुराद्देरेवानुवाद इति वाच्यं। नान्येमिनोहेनाविनिम्नपादिपंचकस्य गिरि
कस्यस्वार्थत्वेणिञ्जं नस्यमित्व निषेधात्। एवं च यस्य नाद्यत्वे वरूपं नस्यात्र पर्युदासः। भौवादिकस्य नटपनिनाययनी
निरूपद्व्यसत्वेन मणाटयनीत्यादौ नादिरूपेपिणंभवत्येवा वाक्यार्थाभिनयं कारयनीत्यर्थ इति भावः लघनिरिति। भू
सहिनणघनिरित्यर्थः महाप्यात्। निसनारूपत्वस्मारकत्वेन इष्टार्थकत्वेन चोभयोर्मांगलिकत्वमिति भावः। पोऽयम्
नीति। षोऽं नमाचष्टे इति णिचि टिलोपे पचाद्यचि षोऽमात्मान इच्छनीति क्यचि रूपमिति कैयटः। एनच्चेति। सूत्रस्थं धातु
ग्रहणं चेत्यपि बोध्यं अपदेशोत्वीति। षकारादिभ्य आचारक्विप्नास्त्वेवान्यथा सुपूधातुत्वाभावाद्धानिकारंभेस्यात्।
मस्याख्याने तु नेति फलभेदः स्यादिति भावः। [illegible]योरिति। आत्वे नोभयोरपि लाक्षणिकतया लक्षणप्रतिपदोक्त

रिभापानवसर इतिभावः।षत्वमहृत्येति।स्यैरइत्यस्यतिस्यासतीस्यादीतिभावः।नद्विंसमिति।द्विमात्रवुध्यभावेपिपर्जन्य
न्यायेनह्रस्वोदुर्वार इतिभावः।दूषणान्तरमाह।ह्रस्वस्येति।पूर्वेमहृतिस्तुवार्णांगन्यायेनेतिमूलेस्पष्टं।सत्वादपीति।हर
तादिमनेइतिभावः।अपिनाऽरूचिर्वोधिता।तस्मादुत्तरकालत्वहृतिरितिसिद्धं।नेविरोधाधात्मागुक्तएवहेतुरितिवोध्यं।ग
निविशेषइति।उत्तरदेशसंयोगानुकूलव्यापारत्वमुभयोःसममित्यभिमानः।एकदेशिमतानीति।अनेनवस्तुतस्तासुत
हणमनुचितमितिसूचितं।नचाटसुरित्यादौविति।आटेत्यस्याप्युपलक्षणमिदं।भाष्ये।यणयोरिति।एओऊः सूत्रे इतिश्चो
षः।विकल्पितत्वादिति।परेतुफरमादिषपिभ्राज इतिपथ्यते।एवंचास्यानुवंधान्तरमस्तुएवंचभ्राजभासेतिसूत्रेभासि
ग्रहवं।भास्तुधातुभेदेनरूपद्वयसिद्धेरित्याहुः।सामानाश्रयत्वंचेति।समानकार्यिकत्वमित्यर्थः।इदंस्वरूपकथनंन

तु समाननिमित्तकत्वमित्यर्थः॥ विभिन्ननिमित्तकेपि इत्याये स्याद्धेवहुशः प्रवृत्तिदर्शनादिति बोध्यं। संवीतिरिति। असं
ज्ञायां क्तिन्नं नं। संज्ञायां स्त्रीलिंगे भावादौ समज्जेनिक्यपा भाव्यमिति बोध्यं। न यकू स्यादिति। हलादित्वाभावात्। धात्वंतर
स्यत्वेन तत्समानार्थस्यार्धधातुके प्रयोगएनास्तीति भावः। इदं चार्धधातुक इति सूत्रे भाष्ये स्पष्टं। विषयत्वापहारादिति।
ज्ञानविषयत्वापहारादित्यर्थः न द्वाहा। नार्धधातुकाभिव्यक्तिः रिति मत्यपलंक्षणं तु ननलुमनेनेति निषेधात्। छ्वोरपीति।
।आरभ्यानादिति भावः॥ नियमोयमिति। अप्रधानामपीति। यमार्थत्वं तु न। नुशोथे स्यादेभारद्वाजनियमेनेडापत्तेः सचने
व इति नेड्ग्रीत्यत्र भाष्ये स्पष्टं। नियमाद्धि पूर्वे वलवत्त्वाच्च। कृसभृ स्न इति चलुप्रवशीकं वस्यकृपरं क्रादिषु च तुर्षु विति
गमनाविरहेण सर्वेषामेव नियमार्थत्वं। ननूमापि नस्येवेति। क्रादिषु नस्येवमापेरिति भावः। एकमेवेति। अन एवो

ग्रा०२०

२८

पदेशेत्वत इति सूत्रे नित्यानि इत्यस्यां जिर्यावर्त्यसेन भाष्ये उक्तः। अन्यथा तद्भावे ऋतो भारद्वाजस्येति विकल्पः। नत्स
त्वेथादित्वमयुक्तं विकल्पस्यैव सत्वेन तदसंगतिः स्पष्टैवाभ्यमनुक्तादिनियमेन तत्सत्वे नित्य इडिति विशेषोस्येवेति इदमेव
मतं युक्तमिति भावः। विपरीत इति। अथानामपीति शेषः। अतएव तु नेति निर्देशमदर्शनमग्ने। न च ऋतो भारद्वाजस्ये
ति नियमप्राप्ति नस्य ये निषेधाय स्वादिग्रहणं विध्यर्थमिति वाच्यं। तथाहि सति स्तुद्रुस्रुश्रुऋतो भारद्वाजस्येत्येव पदेद्वि
ति भावः। विरोधापत्तेरिति। किंच कृञादीनामनुदात्तपाठवैयर्थ्यापत्तिरित्यपि बोध्यं। न संभवतीति। वृङ्माद्यन्तस्यसंभ
वेपिदृत्र्माद्यस्य विधेः संभव इति भावः। अपकृष्यत इति। एतच्च ऋतो भारद्वाजस्येति सूत्रे भाष्ये स्पष्टं तदपकर्षे च धेटा
देरेधिधेत्यादिसिद्धये जग्रहणं। एतेनोपदेशे एजंतानामात्वविधानेनैजंतास्वरत्वतास्यलोरसंभवेनाकृग्रहणमेव

२८

युक्तमित्यपास्तं। अपेक्षायामिति। अत्र जंतस्य धातोः प्रयोगमात्रावच्छेदेनेडभावासिद्धेः सापेक्षेति भावः। एवं थल्यपीति ति
न तासौ दृष्टस्येडभावस्य यत्वनिर्देशः। नेनादेर्घस्लादेशे जघसिथेत्यत्र उवयिथेत्यत्र च नित्यमिट्। न चानयोस्तासेरभा
वेन विशेषणाभावप्रयुक्तो विशिष्टाभावोऽस्त्येवेति वाच्यं। नासिचेत्यनन्तासौ त्यस्य न वृद्ध्य इत्यन्तो न अभ्यानुवृत्त्यैव नासि
नित्यारंस्थली एतेनस्यथेने वसिड नास्त्र दृश्यते न पस्यन्तासाविडभावो दृष्टस्तस्यैव यत्वनिर्देशान्न दोषः। स्थानिवद्भावेन तु
तासौ नित्यानिट्त्वान्निर्देशोऽयमस्त्वीयत्वादिति भावः। थलि नित्यमिडिति। नित्यग्रहणाभावे भारद्वाजनियमेन वि
कल्पः स्यादिति भावः। इति पक्षे त्विति। तुनाहृतिविरोधात्ययं पक्षो न युक्त इति सूचितं। अत्वतः किमिति। अजन्ततास्त
स्य त्वनिरोनित्यमुपदेशे इत्येव कार्यमिति प्रश्नः। अजंतात्वभिन्नोऽन्त्यानुत्पादवत्वे इत्युत्तरं। इष्टाभाव्यमिति। नवकं

ना०र०
२१

दंतेषु विकल्पेन निषेधार्थमिदमिति वाच्यं। अत्र च स्तास्त्वादिति सामान्यसूत्रमप्यनेन भारद्वाजातिरिक्तैरप्यदंतेनेति षे
धस्यैवांगीकारेण स्मृत्यंतरानुसंधानद्वारा विकल्पस्य वक्तुमशक्यत्वादिति भावः। नस्येति। उपदेशेऽत इत्यर्थः इहे
ति। ऋत इति सूत्रे। एवं चैनत्सदृसंबंधवान्य इण निषेध इत्यर्थलाइ इति भावः। इदमत्रैव सूत्रे भाष्ये ध्वनितं इद्दय
स्यापीति। क्रादिनियमभारद्वाजनियमप्राप्तिस्यापीत्यर्थः। अनाश्रितेनेति। न आश्रितो विधानविशेषो येन नाश्रा
श्रितरूपो यस्य न दित्यर्थः इणमात्रमिति। अनंतरमनंतरं चेत्यर्थः। अनारभ्याधीनेनेति। विधिमनारभ्याधीतेने॰
त्यर्थः। इदं वस्येकाजाद्यसामित्यत्र भाष्ये स्पष्टं। न हाह। पसद्य्यमपी। मृत्येपीति। नत्रास्यः क्रादिसूत्रे। आघोत्रे निवोधं
। मदनेचेति। मदनं चित्तविकारविशेषः। गंजातुमदिरा महं। इत्युने इति। प्रथममित्यर्थः। अग्रं पुरस्तादुपरिमाणे पलस्य

२१

चा।आलंबनेसमूहेचप्रांतेचस्यान्नपुंसकं।अधिकेचप्रधानेचप्रथमेचाभिधेयवदितिमेदिनी।इड्‌ऽश्चेतिसूत्रेइति।सूत्रवि
षयइत्यर्थः।परिमाणाख्यायामितिसूत्रेइडश्चेतिसूत्रमुपाहायननुचायमिडःकएवंवंठरंडाकल्पइतिभाष्योक्तेरेवयुक्तं।
विबाघनमिति।विबाधेतिभावेप्रत्ययइतिभावः।छिपाठस्येति कुडिसंघातइतिपूर्वपाठात्।आहारइतिवज्ञप्रत्याहा
रस्येतिशेषः।सहद्धिकेति।नित्यंवृद्धिमुतस्येत्यर्थः।एतदुपपादितं।पठस्यंताइति।अनंतुलासंविज्ञानोबहुव्रीहिः।ननइ
यडिति।अचिश्नुधातुइत्यनेनअभ्यासस्येतितुना।तस्यप्रत्यासत्त्यानरखंडावयवाव्यरत्तएवग्रहणेरितिभावः।स्यानित
येति।समानकार्यिकत्वमेवसमानाश्रयत्वंनतुसमाननिमित्तकत्वंइयायेत्याघसिद्धेरितिभावः।अनत्वेति।अनेनपू
र्वमनस्याप्युक्तत्वंध्वनयति।असवर्णेति।नहृदितिसूत्रारंभसामर्थ्यादित्यर्थः।तेनत्वभ्यासस्यकार्येनदुनरखंडदेशा

रा०र०
३०

स्पनत्कार्यप्रतिबंधकीभूतंस्थानित्वं नेतिज्ञाप्यते ऽनएवारिप्रियादित्यत्रस्थानिवत्त्वेनेयङ् भवत्येवतस्याभ्यासकार्यप्र
तिबंधत्वाभावादितिभावः। अभ्यासस्यानर्थकत्वेति। यङ्लुकि तु श्तिपा शपेति निषेधान्नित्यत्वान्न दोषः। वस्तुतउरित्येव
वक्तव्यं घोरित्यनुवर्तने। इणो यणिति साहचर्याद्याख्यानाच्च ऋधातोरेवग्रहणं। अर्तेरिवर्णस्य यङित्यर्थ इत्युचि
तं। विस्तरस्त्वन्यत्रद्रष्टव्यः। असंभवादिति। स्यात्सनेपदपरत्वासंभवादित्यर्थः। भट्टभास्कर इति। अन्ये तु श्नी एयंवका
निनेत्राणिपस्येति नघ्रुसनिमाहुः। उचितमिति। पदलाघवादिति भावः। पदं तु नकृतमनुदात्तङित इत्यादौ तदनुवृत्ते
ये धातोः कर्मण इत्यादौ धातुपदार्थसंदेहनिवृत्तये चेति शेषः। उपदेशग्रहणानुवृत्त्येति। एकदेशेऽस्वरितत्वप्रतिज्ञाना
दिति भावः। न चकस्योपदेशो इत्याकांक्षायामुपस्थितत्वाद्धातुक इत्येव विभक्तिविपरिणामेन सबध्यते इति वोध्यं वा ३

क१ र्तिकृतेनेति। स्यसिच्सूत्रेवधभावात्सीयुटि चिण्वत्त्वविप्रतिषेधेनेति वदन्नेस्यर्थः। अन्यथा आदेशानामनेनरंगत्वेन विप्रति
षेधासंगतिः स्यादिति भावः। लिङीत्यादि विशेषनिर्देशेन हि विशेषणार्धधातुक इत्यस्यापि परसप्तमीत्वमेव विशेषनिर्देशा
भावे एवत्वस्ते भूरित्यादेर्विषयसप्तमीत्वमार्धधातुक इत्यस्येति स्यसिच्सूत्रे कैयटे एवं स्पष्टं। भाष्यकृतेनेति। एकाच उपदे
शा इति सूत्रे इति शेषः। नत्र हि एवमुक्तं वध इट्प्रतिषेधः प्राप्नोति विधिपीष्टे नैष दोषः आद्युदात्तनिपातनस्वरः प्रकृति
तः प्राप्तस्वरस्य बाधको भविष्यति। एवमप्युपदेशिवद्भावो वक्तव्यः यथैव सनिपातनस्वरः प्रकृतितः स्वरं बाधते एवं प्र
स्य परस्वरमयुक्तं निघातमपि वार्तिके नैष दोषः आर्धधातुकीयाः सामान्येन भवन्तीति। वस्तुतो वार्तिकमतमप्येवमेव वि
प्रतिषेधस्तु यथा तथाग्रे निरूपयिष्यामस्तदाह विस्तर इति। कौस्तुभे। वोढे स्पाष्टे। पण्यायामिति। नत्राय प्रत्ययान्तादस्य

ग्रा०र०

३९

येदापि व्यवहारमित्यर्थः। नेति वाच्य इति। णिलोपो नेत्यर्थः। अचकास्त् इति। सत्य यस्यां गांडोउत्थिता कांक्षत्वेन नद्वय
स्यैवौचित्याच्चङ्परे णाविति नाचो विशेषणमिति भावः। सनि य इति। सनि य इत्यर्थः। इदं च स्तौतिण्योरित्यत्र कैयटस्य ध्वं
।नन्वेति। गुणानां च परार्थत्वादिति न्यायेन सनीत्यस्य साक्षा दनुवाधे ऽन्वये संभवति अश्रुतेन द्विशेषणे ऽन्वयायोगादि
तिभावः। दूषणांतरमाह। अधीषिषतीत्यादि। अभ्यासस्येति। अभ्यासाकारस्येत्यर्थः। अव्यवधानसंभवादिति। एवं च ण
पचिषतेरित्यादावपि न प्राप्तिरिति भावः। सन इत्येवेति। अलोंत्यस्येत्यनेनांत्यस्येति भावः। भाष्योक्तेश्चेति। नन्वेवं व्याख्या
नेपिप्रत्यासन्नत्व प्रयुक्ताभ्यासस्येत्यर्थोन्वयं तात्सनि दोषः। किंच परत्वाभावे ऽस्येत्युक्तौ न लाघवं किंच यथाल

सन्या२

क्षणमप्रयुक्ते इत्यस्याप्रयुक्ते लक्षणाभावस्येव योग्यतानतुलक्षणास्ये त्यर्थ इति बहुशः कैयटेन व्याख्यानाद

३९

स्येवार्थस्ययुक्तत्वाच्च जगुष्ट्यादिभ्य आचारक्विबंतेभ्यः सनोनभिधानमेवोचितं। अपिच सन्यतो योभ्यासाकारस्तस्ये
निव्याख्यानेपिपयऊल्लोपस्यानित्वान्नयङन्तात्सन्निदोषः। अपिचासन्निमित्ताभ्यासस्येत्यर्थेपिस्तौतिण्योरिति सूत्रे
ऽधीविषनीति प्रयोगादत्र सूत्रेनहि कार्यीत्यस्य न प्रवृत्तिरत आह। आस्तांतावदिति। न परप्रयोजन विचार इति शेषः
।सूत्रे नत्वादिनिर्णवं च निर्दिष्टस्थानिकत्वाद्वचथ्येनिलिंगाभावादलोंत्यस्येति च न प्रवर्तते। परेतु लघ्वेनाभ्यासस्येत्यर्थः
अलोंत्यपरिभाषया चेष्टसिद्धिरित्याहुः। तदुपरणिश्चरमिति। इदमेव व्याख्यानं प्रकृतसूत्रस्थभाष्यकैयटाणश्रीनि
सूत्रस्थकैयटारूढमित्यन्यत्र निरूपितं। इत्यादिभाष्यादीनि। इत्याद्युदाहरण परभाष्यादीत्यर्थः अवयववर्णे
नि। ऊर्णुइत्यंगेनत्रवयवोनुःद्विरुक्तोपिसवर्णेत्संगावयववर्णेत्यर्थः। अयमिति। द्विरुक्तइत्यर्थः। ननुनस्येति। द्विरुक्त

ग्रा०र०
३२

नुज्ञारस्यद्वित्वं। योनुज्ञारइत्यर्थः। उपन्यासार्हमिति। वस्तुतस्तदसार्वत्रिकत्वमप्यसिद्धं। फलितमिति। तत्र हि पक्षे पू
र्वोभ्यास इत्यत्र कार्यविधायकसूत्रस्थाभ्यासपदेन राविभक्तिः पूर्वशब्दोत्तरं कल्प्या पूर्वोभ्यास इति प्रथमासाधु
त्वार्थात्काबोधानारिति चागेन समानाधिकरणमिति भावः। कर्मणि षष्ठीति। कारकविभक्तेर्न्याय्यत्वादिति भावः
।अंगाधिकारस्थकार्यसमीपगमनेनाप्यंगसंनिधानात्। माधवमतमिति। अत्रारुचिबीजं तु प्रकृतसूत्रस्थभाष्यवि
रोधः। तत्र हि इह कस्मान्न भवत्यजजागरत्। लघुनि चङ्परे इति उच्यते व्यवहिते चात्र लघु चङ्परे इत्युक्तं। चङ्प
रेणोपलघुनरभ्यासस्य व्यवहितमिति तदर्थः। तद्धीत्यांगस्य द्विरुक्तभावेन शंकाया एवानुपस्थित्यात् तदसंगतिः स्प
ष्टैवाग्रे षष्ठीत्वेति। अवयवषष्ठीत्वेत्यर्थः। अरुचिबीजांतरमाह। स्यादेतदिति। इहापीति। सन्वल्लघुनीत्यत्रापी

३२

सार्थः । स्थानिवद्भावेनेति । निषेधेन चेत्स्यपि वोध्यं । आपुगागमे चेति । इदं चलु ङि अस्याभिधानं कृत्वा चिंतनं तथा गीकृ
तं वस्तु नस्त्वनभिधानमेव । आपुगागम इति भाष्योक्तपक्षांतरे ह्रस्वाभावेनानयोरभ्यासाफलभेदापत्तेः । सार्थक
मिति । नह्यचिस्तणदित्यादिगुणे व्यक्तस्य र्थत्वद्दीत्याचङ्परणिपरलघुपरत्वाभावाद्भ्यासानर्थक्यस्य षष्ठमेव ।
।मतमेदेति ऊर्णोत्युक्तं त्वरुचिमस्तमेवेति नत्वं स्यष्ट एवेति । अयं पक्षो भाष्यानारूढः । औदिदरित्यत्र दीर्घापत्तिर
प्यत्र पक्षे चङ्परे णौ यदंगं मौ दिदृइति न दीर्घाभ्यासस्य चङ्मादाय णिलोपस्य स्थानिवत्त्वेन णिमादाय वा लघुप
रत्वात् । नानीवेति पक्षद्वयस्योभयोरपि संमतत्वादिति भावः । तथा च सन्वल्लघुनि चङ्परे अग्लोपित्वाद्धामीमपदिति सि
द्धमिति भाष्यमुपादाय मीमादीनामंगानां सनि मीमेत्यादिनाभ्यासलोपो विहितो यं त्वभ्यासो ऽयं तानामिति । अन्ये तु

= नन्वस्य तालव्यांतत्वेनैव विभ्राडिति सिद्धं भ्राजिसूत्रे भ्राजिग्रहणं व्यर्थमिति चेन्न जांतस्यानुकरणे जांतबोधकस्य विभ्राडित्यस्यासिद्धेः। =
= परम भ्राज भ्राजे चेष्टे परम भ्रष्ययितितः किं पिनिर्जर शब्दे जराशब्दत्ववद् भ्राजि ... दशोनत्वेन शब्दे भ्रस्यापि ... परम वृड् इत्यस्यासिद्धेश्च =
= संयोगांतलोपस्तु न परत्वात् प्रतिषेधात् ... अनुनासिकप्रवृत्तियोग्यस्य ग्रहणं परिनिष्ठितो... ३ =

ग्रा०२०
३३

चङ्परे लोपदृंगेन रभ्यासस्य सन्वत्त्वं विधीयते। लोमीमाहीन्येवांगानीत्याह। अन्ये तु अंगस्याभ्यास इत्यत्रांगं किं निरूपि
तंस्यात्। चङ्निरूपितं लोनिरूपं चेति के यदीयपक्ष इत्यनात्स्यर्थं न तु लघु अर्थे इति। आद्यपक्ष एव सर्वसंमत इत्याहुः। पठि
त्वोन इति। माधवादिभिरिति निर्दोषः। एवं च बहुविरोधाद्दोपदेवो हेय इति भावः। फणादिरिति। यद्यप्ययं फणादिषु नास्ति
अत एव वा जृ इत्यत्र भ्रमुग्रहणं तथापि फणादिष्वेव भ्रमुत्रसिं च पठित्वा फणां च नवानामिति सूत्रे कार्यं वा जृ इति
सूत्रे भ्रमुत्रसिग्रहणं च न कार्यं न च दिवादौ रेत्वाभ्यासलोपानापत्तिः। वभ्रमुरित्यादेरिष्टत्वेनापादनेरिति तात्पर्यं। अ
नुदित्त्वादिति। नुदादिगणे इषगमीति सूत्रे चेत्यर्थः। पक्षे। अनुदित्त्वपक्षे। लुक् प्रसंगादिति। अत्र च नलोपस्तु धात्वं तरे च
रितार्थ इति भावः। भाष्यकृतेवेत्ति। इषेश्छत्वमहलीति वार्तिकप्रत्याख्यानार्थेति भावः। एवं च धातुपाठे सूत्रे चोदि

३३

सादेनार्थ इति सूचितं । नं चेबोकनयेति । हृत्वा वेबोकनयेत्यर्थः । अनुदित्वाद्यपाक्षिकत्वस्येति पाठे इदं अनुदितः पाक्षिकत्व-
स्येति पाठे भाव्ये एवेत्यर्थः । वार्तिकारंभे ऽनुदित्वभावादिति भावः । मध्येऽसवंधस्येति मंडूकप्लुत्येति भावः । अत एवमथमोस्थि-
तक्रमः परस्मैपदे क्षित्यत्रैवाहत्य निवार्तिकोपन्यासेन तस्याख्यानेचाचीति अनुवृत्या कर्तव्ये इषेति सूत्रे तत्करणं भा-
व्यसंगच्छते । ननु तृष्यइति वतृशमादिनि वहुवचनेनाद्यर्थलाभे सिद्धे ऽष्टानामित्युक्तिः प्रत्येकव्यापारार्थेति उक्तनि-
यमः । सुलभोऽन्येषां तु विध्यर्थमित्यत आह । अष्टानामित्युक्तेरिति । मदिसंग्रहार्थनयेति । मदं तमाचसंग्रहार्थ नयेत्यर्थः
। अन्यथा तदुत्तरेषामपि ग्रहणापत्तिः । मधुनरं तत्करणेनु गौरवमिति भावः नन्वेवं शमादिषु क्रमेः पाठसामर्थ्या-
त्तथा नियमो ऽत आह । शमादिषु क्रमेरिति । मकारांतेति । इदमुपलक्षणं उवर्णांतस्य दभेस्त्वपि बोध्यं । नाति प्रयोजनेनेति

श्री०र०
३४

नवहृस्रयोजनमित्यर्थः। धिनुणरूपैकप्रयोजनार्थत्वादिति भावः। अभिमनेनेति। अनेनापि प्लुवदित्यस्य प्लुअपुप्लुवदित्य
स्यसिद्धाविति भावः। सुपूर्व्वेति। षोपदेशत्वाद्नरस्य षः। एतत्रैव रूपमित्युत्तरं। अपहां नेतुमेदृइत्यादिरीर्ष्याविरित्यत्र नोग
थः। सिद्धत्वादिति। अन्तशब्दस्य पूर्वनिपाताभावे तेश्चैस्यपि बोध्यं। समीपवाचिनेति। ओदकांतादावनानामिति यस्रोथ
मनुद्गजेदित्याहौ दष्टेनेत्यर्थः श्रोथः पाथः। श्वह्लीति। इहचांतः शब्दः समीपवाची ओदकांतादित्याहौ पूर्वमूतसमी
पेपि दर्शनादित्याशयेन अत्रापरगतसामीप्यवाचित्वराग्रहे तुल्यपि रम्याद्यावेचहोषइति बोध्यं नचेति। समीपपदा
र्थस्य शब्दाकांक्षासत्वेन तन्निहृतये शब्दन्वयोचितस्येनावृत्तिर्हचिनेति भावः। अतः समीपभूतेरफलकारांतस्यांग
स्यातो वृद्धिरित्यर्थः। नाकारसमीपइति। भाष्यप्रामाण्येनाव्यवहितसमीपएवांतशब्दशक्तिरिति भावः। तत्रप्रत्यास

३४

स्याद्वृद्धिस्थानील्लसमीपभूताकारएवगृह्यतेऽतोत्सारीदित्याद्यावद्योनवृद्धिः। भाष्येतुरेफलकारांतांगावयवास्यल्लस॰
मीपस्यानइतिल्लपद्वाद्वस्यार्थउक्तः। तत्रलकाररयोःप्रत्यासत्त्यैकत्वलाभेनांगास्यलकारसमीपाकाराभावादृश्चल्लीदित्या
दौनदोषः। अंतग्रहणसामर्थ्यादेववर्णग्रहणेविज्ञातेंतग्रहणंना। [illegible]तेनहलंतग्रहणेनेनउत्तरंवृद्धिभाजामेवसिचूपर
त्वेनविशेषणादंतग्रहणंव्यर्थमित्यपास्तं। नेटीत्येवेति। पुरस्तादपवादन्यायेनेतिभावः। तथाचरेफग्रहणवैयर्थ्यापरि
तितास्यर्थं। विकल्पस्याप्राप्तेरिति। अश्वल्लीदित्यादावंतस्येतिविशेषणान्नवृद्धिरितिभाष्यविरोधाच्चेत्यपिबोध्यं। [illegible]सार्वत्रि
कतामिति। दिवश्चोदित्यादिसूत्रस्यभाष्यप्रामाण्यानाप्रत्ययविषयेपितत्प्रवृत्तिः। नहिसर्वत्रसजातीयापेक्षैनेवज्ञाप
कस्यासीतिभावः। समुच्चितत्वंतीति। ज्ञापकसिद्धंनसर्वत्रेत्यनेनाप्रवृत्तिरितितत्वं। [illegible]त्तेःकिलमिति। अन्यथैकानु

ग्रा०र०
३५

वंधपरिभाषयाऽस्येवग्रहणंस्यादितिभावः। परिभाषायाइति। सामान्यतोवामहेवाञ्चनुञ्याविति सूत्रस्यडित्वज्ञापि
तपरिभाषामात्रस्येत्यर्थः। एतच्चदीर्घोकितइतिसूत्रस्यकैयटानुरोधेनोक्तं। वस्तुतोह्रस्वेस्यत्रानुबंधानुच्चारणेनत
दनुबंधकग्रहणाभावात्परिभाषाया अप्राप्तिरेवेतितत्वं। अश्वानांगतौ॥ति। धातुपाठेगतिश्चानुपंमश्वतिष्ठमेववि
वक्षितमितिभावः। दीर्घइति। तदालघूपधत्वाद्गुणाभावः। दीर्घोपधोप्ययंल्युट्युपधेइत्यस्य। इतिभावइति। नचत्व
ख्यानेनहिकार्याणिन्यायेनजयतौकृत्वानापत्तिःसनन्ग्रहणसामर्थ्येनतस्यन्यायस्येहाप्रवृत्तेः। यदितुजेयेइत्यु
कृसत्वेनदृंनाञ्चसन्सत्वेनदृठनरंमानमितिसुअनेनाप्रापरत्वेनव्याख्यानेपिनदोषः। एतच्चमाधवादिग्रंथविरोधाप
नेरित्यनेनसूचितं। पक्षेइति। धन्विकृएण्यारचेत्युभयविधानादितिभावः। नचतवापिपक्षेरापदुर्वारःरापःसा

३५

मान्यविधानेन ननु कृणप्रयुक्तविकरणौरि वधिन्विकृण्व्योरित्यप्रत्ययेनापि बाधेनादोषात्। नवगणपाठेन सूत्रेण

च द्वयोः पर्यायः स्यादिति नास्यर्यबोधदेवेन त्विति। अत्राहुश्चिवीजं तु अनयोर्भावाद्धो लुङि नङि ननादिभ्यस्तथासौरि

नि पक्षे सिचो लुगापनेः। पथ्यादिति। एककालविधानेऽपि नद्युपदेशादं नत्वमस्त्येवेति चिंत्यं। आमुद्धास्याद्दाविति पाठः। आ

चोत्तमे इति। धिविकृवी स्वादिगणे पठितावित्याकारे इत्यर्थः। घुनिर्दीप्तिः। श्रुनिश्रवणे। विशः प्रवेशः। स्रहोग्रणे। वधोहिं

सा। कामइच्छा। कृतिः क्रिया। नद्मा त्रेति। आत्मनेपदोपलक्षणमिदंतेनेनभासमानसिद्धिः। ननु भुजपर्यायो बाहुर्वाधने

रिति अरुचेराहा। स्तुध्वेत्यादि। कचित्विति। अनुदात्तेत्वलक्षणमात्मनेपदमनित्यमिति तु भाष्यानुक्तत्वान्नसाधुत्वे

नियामकमिति नदाशयः। केयराद्दाविति। केयरस्यादिभूते प्रथमे व्याख्येये भाष्ये इत्यर्थः। नास्तीति। अस्य यद्रस्यादि

गु० १०
३६

निर्दृशास्त्रेहलिंगा।कृत्स्येवेति।कृत्स च रस्य नः कृतीत्यनुवर्तनात्।पूर्वानरसाहचर्याच्चेतिभावः।आकरविरोधादिति।कृ
त्स च इति प्रकरणविरोधादित्यपिबोध्यं।नर्तेस्त्स्येति।ऋतृन्नादिडियेनेत्यर्थः अयं चापदिष्ठयः शास्त्रार्थः।कर्तरीति
।कर्मणि घत्सीष्टेत्यादेरैवलापार्धधातुकत्वादस्येव प्रयोगः अयं कर्मव्यतिहारे कर्तव्यस्तेव प्रयोग इति भावः शपि
वय इति।चिणोप्युपलक्षणमिदं।इत्यादिना।आदिनोच्चारणार्थत्वमिति कश्चित्।पठितुमुचितइति।दं द्रु गर्भ बहुव्रीहि
गर्भो दं द्रो व्याख्यानादितिभावः।नत्विहेति।केचित्वा घोदंत्योष्ठ्यांतो न्यायमप्यर्थसाम्यात्पठितावित्याहुः मूलं त्वा घस्या
पिचवर्गन्तनीयांनत्वमितिमतेबोध्यं व्याख्यानमिति।सानुबंधकत्वं तूभयोरपीतिभावः।गुणः स्यादिति।गोरवं च
स्यादिति अपिबोध्यं सत्रांतरेप्येवमेव व्याख्या इत्याशयेन तत्र फलमाह।पचेइत्यादि।एकीयमतागतं स्थितं स मा

३६

ष्पमहृतं न्विदमेव गमयति न्विपतीत्यादि। निषेधस्येत्यादिना। नासिचकृप इति सूत्रस्थ चेनेति भावः। नञानयो
रभावमिति। वर्णिषीष्टेत्यत्र सार्धधातुकस्यैव नञानरूपत्वान्नदभावाभावेन न दोषः। न च विवर्णिषत इत्यत्र ल
उपधुसनेः पूर्वं निषेधापत्तिः। नञानयोरभावशब्देन नञाननिरूपितनिमित्तत्वाभावे पलक्षणो नादोषात्। पूर्ववत्स
न इत्युक्त्या अत्रापि वृत्तेरात्मनेपदनिमित्तत्वात्। विवृत्सिष्टीप इत्यत्र च न दोषः। वृत्तेरात्मनेपदनिमित्तत्वाभावात्
।निमित्तत्वं च फलोपहितं न निवेश्यं तेन विवृत्सितेत्यत्र तङ्नेनेन न दोषः। हेर्लुकि चेति। परस्मैपदे परे इत्यर्थे तु न सिध्य
त्तान्न च मत्यपलक्षणेन नस्य रत्वं न लुमतेति निषेधात्। न चार्द्धधातुकस्येडित्यत्र वांगनिमित्तस्य सार्द्धधातुकस्य
स्यर्थान्। हि निरूपितं नांगसंज्ञकस्यात्रोद्देश्यकोटौ न प्रवेश इति न लुमतेत्यस्याप्राप्तिः। अत एव भाष्ये वृत्तादिम

न्या०र०
३२

निषेधे परस्मैपदेषु चेत्कृत्युपसंख्यानमित्येवोक्तं न तु हेतुरुक्तोऽस्यपीति वाच्यं। लक्षणापक्षे दोषशंकैव नेत्यभिप्राये
णास्य प्रयोजनत्वोक्तेरदोषात्। स्पष्टा चेयं रीतिः स्नुक्रमोरिति सूत्रे भाष्ये। अत्र भाष्ये नि। एवं हि अत्र भाष्यं। अविशे
षेण हृतादिभ्य इट्प्रतिषेधमुक्त्वा आत्मनेपदे न समानपदस्यस्येड् भवतीति कर्तव्यमिति। हृतादिसंबंधिनः सादे
रार्धधातुकस्यात्मनेपदे न समानपदस्यस्येडिति तदर्थः। न निवर्तते इति। वार्तिके आत्मनेपदे नैव समानपदस्या
स्येत्यर्थात्। अयं च कृतोः स्नेः आकृसुवं नेनापि समानपदस्य इति न दोष इत्याशयः। एतेनैतेन द्वार्तिकस्य नियमा
र्थत्वमाश्रित्य निषेधसूत्रप्रत्याख्यानेपि न दोष इति बोध्यं। एवं च स्नुक्रमोरिति सूत्रस्य वार्तिकसमानाकारवार्ति
ककरणेन तत्प्रत्याख्यानरीत्यैव तत्प्रत्याख्यानमपि भाष्ये ध्वनितमित्यनेन सूचितं। अर्थनियम इति। अन्यथा श

३७

ष्विकरणानां घसादिषु ठादेव सिद्धो ध्यनञ्ग्रहणादेर्वहिर्भूतपाठस्यैवैयर्थ्यापत्तिरिति भावः। मितत्वमस्त्येवेति। अर्थेमि
हृस्य क्रियावाचित्वबोधार्थं चारितार्थ्यादिति भावः। ध्यासेति। अनेन भाष्यमत्रोदासीनमिति सूचितम्। मितेनेरिति
।हलादिः शेषेण भा भायायाइत्यर्थः। अत्र पदकृत्यं तदन्यत्रोक्तं। हरदत्त इति। अत्रारुचिबीजमादित्वं रुष्यमत्वरेत्यस्य
भावादिकर्मणोर्निष्ठायाम प्रवृत्तिज्ञापनार्थं एवं च विभाषाभावादिकर्मणोरित्यर्थेन नू। आत्मनेपदं तु आकारेणासि
ध्यतीति ज्ञापकमिति। न च सूत्रे इत्युक्ते पिसाहचर्यादलुग्विकरणस्यैव ग्रहणं भविष्यतीति वाच्यं। तस्य बहुशो व्य
भिचारात् लुग्विकरणस्यैवेति नोक्तं लक्ष्यानुरोधेन तत्रैव कल्पनात्। ध्वनिता चेयं परिभाषा यस्य विभाषेत्यत्र भाष्ये। न
त्र हि विदित इत्यत्र निषेधमाशंक्य यदुपाधेर्विभाषा तदुपाधेर्निषेधः। विभागमहनविदविशामिति सूत्रे ज्ञाविकर

ग्रा०र०
३८

णस्यग्रहणंलुग्विकरणश्चायमिसुक्तं। तत्रचोद्येनौ। यत्तोयंलुग्विकरणोऽतोविशिसाहचर्याच्छविकरणस्यैवग्र
हणंननुहन्तिसाहचर्याद्दर्शद्रेरेतत्परिभाषानुग्रहायेतितत्राशयः। शीस्यमानइति। बोधयितुमिष्ट इति तदर्थः। त
थाचेति। माधवमतेइतिशेषः। क्रूरोत्रेति। षष्ठ्यनुरोधात्। भावप्रधानत्वेनेत्यर्थः। हसवत्स्विति। फणस्यमुत्सनेघित्यर्थः।
सज्यतेइति। तत्कालावधारणमित्यनुकृष्यते। अकारस्यस्यानित्वंतुत्यज्यतेनत्यागेमानाभावात्। अतएवदीर्घो
पधानांकरणादौपाठश्चरितार्थइतिभावः। रत्वेति। अनुदात्तोपदेशेत्यनुनासिकलोपः। लुग्विकरणत्वाद्धितिपेर
त्यस्यनुशितिपारुपाभावात्ग्रहणमितिबोध्यं। सौत्रइति। अन्यथात्राहपरत्वेनागमोत्तस्यात्गुणश्चस्यादिति
भावः। विकरणलुकैर्नैर्थभावाद्येत्यपिवक्तुंशक्यं। अतएवमक्तुतेऽतिमत्तौनित्रयोगः संगच्छते। आकारादित्वाभावा

३८

दिति।नचशब्दाश्रितेसार्वधातुकेस्युलुकाविनिपरनिमित्तनयास्यानित्वेनशब्दप्रमादाद्यदोषदुर्निवार्य्यं।आक्षेपेआशि
षस्यवाञ्छादेःन्वयेमानाभावात्।अतएवजुहुतइत्यादौनगुणः।श्लिपिनादेशास्त्रयोःसन्निश्रास्यनिष्पत्त्येनिनिर्दे
शादिभावः।यद्यपिशानुसत्योःशकारादेःसंभवोऽस्त्येवनिष्पन्नत्रयनइत्यादाविवनव्यापिरशिशिदिसाहचर्या
न्ननयोग्रहणमितिबोध्यं।अत्रपरंदृष्टतरंमानंचिन्त्यं।शिस्यचानिशिद्रूपेचास्त्यर्थः।भाष्याननुगुणत्वादिति।स्वस्नेहप
सख्यानमितिवार्तिकादितिभावः।अस्यैवधातोरिति।स्वनिष्पन्नरूपेणैवप्राप्येणधातुष्वर्थनिर्देशादितिभावः।नत्वे
वंशाद्नेस्येवबतुंपुक्रमतआह।प्रसिद्धंचेति।नत्वप्रसिद्धमितिभावः।तत्रदृष्टान्तमाह।गम्लिति।यथागतिपाकादिभिः
शादेफलवाचकेरपितदनुकूलव्यापारार्थकस्यार्थनिर्देशात्पाप्रकृतेशानननन्यविशारणार्थकस्यशाननपदेनार्थ

ग्रा०र०
३९

निर्देशा इति भावः। अत्र नेपदी गत इति। यद्यपि पूर्वं न पठितस्तथापि कश्चिद्धातुर्वर्तते नोपलभ्यत इत्यभिप्रायेणेदं। माध
व इति। पृषोदरादित्वाद्रूपमित्यस्य न्यो। अव्युत्पन्नः सर्वे न रतं तन्त्रसिद्धान्तबाधकविचारार्थः पस्य शाशावद् इत्यस्य उभयतः
स्याशेत्यप्यस्यैव। धातोः किमिति। ठौ किंतु साहाबेनुपदेशसामर्थ्यात्समुदायोपदेशाद्यावयवानां नान्तरीयकतयो
च्चारणेनैवोपदेशाभावाच्च न दोष इति भावः। उपदेशेल जिति। ओ इत्याद्योकारादिष्वच्चारणं तु सर्वनामस्थानविषये।
गोतोणिदित्यस्य तन्निमित्तकवृद्ध्यपरत्वात्प्रवृत्तौ चरितार्थं न चोपदेश इत्येतेन विशेषणं धातोरित्यस्याभावेन
दलाभादिति भावः। अत्र वदन्ति। उणादीनामव्युत्पन्नत्वेनेदं फलं। किंच। धातोरित्यनुवृत्तावुदीचामाङ इत्यादावात्व
माप निरनुबंधलोपेन तेदं न द्विर्मुक्तस्यैव धातुता या न धातुलोप इति सूत्रे भाष्ये कैयटयोः स्पष्टत्वात्। किंच तत्सत्वे

३९

धातुसंज्ञायांउं नस्य धातुत्वेएजं नस्य धातुत्वाभावः। नचतत्सत्वेपितत्प्राग्भागस्यैवधातुत्वमितिनदोषः। एवंहिउ-।
कारसत्वेपिधातोरुपदेशेरुजंनत्वानपायेनात्वेबाधकाभावादस्यनिर्देशस्यनानुबंधकृतमनेजंनत्वमित्यर्थज्ञापक
ताभाष्योक्तासंगतास्यात्। तस्मादुपदेशेइतिषष्ठ्यर्थेसप्तमी तस्यचैवइतिविशेषणमेजंतस्योपदिश्यमानस्येत्यर्थइ
तिभाष्योक्तमेवसाधु। गोम्यामित्येवोपदेशपदफलं। गोघ्नइत्यादिस्त्वनुवादोनोपदेशइतिस्पष्टंष्यङ्विधायकेभाष्ये। उ
णादीनामव्युत्पन्नत्वाद्धुइत्यादीनामुपदिश्यमानेजंतत्वमस्तीतिनवाच्यं। एवंचोपदेशग्रहणस्यवर्णग्रहणेलक्षण
प्रतिपदोक्तपरिभाषाऽप्रवृत्तिज्ञापकताचिंत्या। अतएवभाष्येगोम्यामित्येतत्प्रत्याहृतयेधातुग्रहणानुवृत्तिमुक्त्वाथापिनि
वृत्तेनद्दिसाधुकं। मेऊदोपरसत्वेतस्योपदिश्यमानेजंतत्वाभावेनतस्यनानुबंधकृतमनेजंतत्वमित्यर्थज्ञापकतासु

ग्रा० र०
८०

स्या। अनुबंधलोपे तु एजं न त्वाभावेपि धातुसंज्ञादिकार्यार्थं नावनोप्युपदेशे नास्यर्थं ज्ञोपदिश्यमानस्यैजं न त्व सत्त्वेनभ
वस्येवात्वं पुग्विधौ गामादाग्रहणेष्वविबाध्याप्यगन इत्यादिभाष्यप्रयोगानुलाक्षणिकाकारं तस्यापि ग्रहणमिति ज्ञापयती
त्यादौ न दोषः। अनएवोत्सूत्रादौ वर्णग्रहणे ग्रहणेपि लक्षणप्रतिपदोक्तपरिभाषा भाष्ये संचारिता घुप्रस्यव्यावर्त्यमि
त्यपदिति। अन्योन्याश्रयादिति। पूर्वमनिषेधप्रत्यये कृते आत्वे नुपदेशत्वस्यावश्यत्वादेपामभावानिषंस्य ष्वमे
व। नक्षनिरिनिरिनि। सुग्ल इत्यादिलक्ष्येन क्षानिरित्यर्थः। विषयसप्तम्यामपि परनिमित्तत्वसत्त्वात्। जग्ले इत्यस्य
त्वसिद्धिरिति बोध्यं। प्रसज्यप्रतिषेधेपि शितीति विषयसप्तमीति बोध्यं। कर्मव्या। निहारे इति। राधात्तोरिति शेषः। पूर्व
विप्रतिषेधेनेति। गुणे वृद्धौ प्रक्रियागौरवं स्यादिति। एतद्वाचिपरशब्दाश्रयेण पूर्वं वृद्धिस्वीकारणे बोचित इति तदाशयः ८०

।न त्विति मूलमिति। ननु ऋदंधातोर्लिङि गुणाद्वृद्धिः पूर्वविप्रतिषेधेनेति वार्तिकं मूलमता। आह। निष्फलमिति। न च पूर्वविप्र
तिषेधाभावे परत्वाद्गुणे सकृद्गतिन्यायाद्वृद्धिर्दुर्लभेति वाच्यं। गुणप्रवृत्तेः पूर्वमत उपधाया ऋत्वस्याप्राप्तौ कृन्यायस्या
क्तिसंभवाभावात् नुस्यंचेदं कैयटे। प्रक्रियागौरवं तु न वचनापेक्षयाधिकं दुष्टमिति न दोषः। उक्तेति। न्यायप्राप्तमानदनु
स्पसेत्सर्यः। अर्थमिति। न चाप्युवमित्यादौ दोषः। तत्राडागमस्याभीयासिद्धत्वाद्वेवयणभावसिद्धेः लाघवस्यायामडागमेपि
न तस्यान्याश्रयमपि न त्समानाश्रयमित्यस्मिन्सिद्धत्वं बोध्यं। न चाचारक्विपि भानवतीलादौ दोषः। परेण गुणेन बाधात्।।
अयं च मध्येपवादन्यायेनोवङ एवापवाद इति भावः। आरभ्यमाणेप्यस्मिन्सूत्रे इति भाष्यात्। एतदर्थमसिद्धवत्सूत्रारंभ ८
णवज्यायानि परे। वांद्रास्त्विति। अत्रारुचिबीजं तु पाणिनिसूत्रभाष्यविरोधः। इति भाव इति। व्याख्यानादिति न त्वे। विशेष

ति

280

शा०र०
४१

विहिते नेति। सत्यपि संभवे बाधनं भवतीति न्यायात्। अत एव यासुड्विषये सीयुड्वेति भावः। पीरुप्यात्म्यामिति। प्यायः पीच
श्चिउः स्यात् इट् मस्ते भूरित्यादीनामप्युपलक्षणं। लुकः श्लुह्नेरिति। न च धे ये धासीदित्यादौ दोषः स्यात् साहचर्येण घो रपि
परस्मै परस्मैपदेऽग्रहणे रिति भावः। एतदपेक्षयानुवृत्तिरेव लघीयसी। न स्यस्तरि नत्व प्रतिज्ञानात् उश्च विभाषोपय
मने इत्याद्यर्थमावश्यकी तिपरे। उनिपवट् इति। परस्मै ते चिकित्सः जुगुप्सा विरामे त्यादौ विशेषार्थप्रतीते र्विचिकि
त्सानुसंशय इति कोशबलात्। गुपगोपने इति धातुवृत्तिषु प्रयोगाच्च विशेषलाभ इत्यपि बोध्यं आयुदात्तः सिध्यतीति।
अनो लोपे यह तस्य घ्यम्चकत्वात् उक्यश्र इति तुण्डार्थसमिति भावः। यदुत्पत्ति बेलायां छन्क मित्यर्थे प्यदोषमाह। अजंनमू
नेति। अनो लोप इत्याद्या वाईधातुक इति विषयसप्तमीति पूर्वं लोपहृते नेमो न पूर्विका जंनत्वमाशयपदिति यतो ना

वर्तिसूत्रे भाष्ये स्पष्टं। एवं। स्वं च यदित्यत्र निवेलायामपि द्वाकत्वमिति भावः। विषयसप्तम्यामपि तद्धितार्थविषयेऽज्ञात॰
स्य द्विगोर्निमित्तत्वं यथा तद्धिते द्विने द्विगोर्लुगनपत्ये इत्यत्रोक्तं तथा लोपस्यापि परनिमित्तकत्वमस्ती। निगणयतीत्यादौ
अल्लोपस्य स्थानिवत्त्वाद्धिर्न निबोध्यं ननु हेनाद्गादुतरस्य लोप इत्यर्थेन हर्यिनेत्यादौ लोपव्याहतौ संघातग्रहणेन
फलमत आह अपि च पापच्यते इति। कथं चिद् इति। उक्तव्याख्यानेनेत्यर्थः। पापाक्य इति। न च निष्ठायामनिट इत्युक्तेः
कुत्वं दुर्लभं यस्य कुत्वं तस्य निष्ठायामनिट्त्वेनादोषात् इति भावः। भिन्ना एवेति। चुरादिभ्य इति शेषः। तेषां च सन्मात्र॰
फलकः पाठ इति भावः। परे त्वेवं सति भ्वादावनुदात्तेषु गुपगोपन इत्यादिः पाठोऽनर्थकः। तस्माद् द्विकरणमप्येतत्। अत
एव दाधर्ती। निसूत्रे निजेर्यङ्लुगन्तात्मनेपदमिति भाष्ये संगच्छते। अन्यथा णिजन्तात् घञ् णिलोपयोरपि निपातस्तत्ता

रा.र०
४२

वक्तव्याख्यानात्।गुणादिष्वनुबंधकरणसामर्थ्यात्समनंतात्मनेपदमित्यस्य भाष्यस्य सन्नत्र कृञि षष्ठ्यर्थविशेषविशिष्टेषु
नत्कृञ्करणसामर्थ्यादित्यर्थः।मूलद्वयमपि हत्यनुरोधेनेत्याहुः।भंत्के नि।पूजायां दृष्टान्मानोजिज्ञासापूर्वके विचारे सनि
स्येवं भंगइत्यर्थः।तस्मादिति।नदर्थकादित्यर्थः।इत्युक्तेरिति माङ्मानेइत्यस्य मानेपदित्तान्माङो विचारे सनित्यर्थः।क
र्तृव्यः।अर्थविशेषेडि।त्कृञ्करणात्स्वंतात्मनेपदं।[illegible]दिसाहचर्येणेति।अन एव मनिमीमांसनइत्यत्र नेर्गदेतिणत्वंन
।तत्साहचर्येणेच्छासनंत एव माङ्अपि नत्वमहूनेः।अनुदात्तेनत्वहलादेरितियुक्त्वस्मान्नापरेणसनाशंसेत्युभस्यपे
णवाधात्।अन एव नि निस्तुःक्षमिनाक्षमीत्यमरोबीभत्सुरित्यर्जुननाचमसंगच्छते इतिदिक्।आमादिकरणेवेति
।भाष्येधदर्शनादितिभावः।अपंचितमिति।वस्तुतस्तुगुप्तिचूकितमानाअनुदात्तेतइतिभाष्यस्वरसात्किनेरनुदात्ते

४२

त्वमेवोचितं न विचिकित्सतीति छांदसं कैयटस्य प्रमाद इति वर्धमानानाद्यमन्ये। प्रमादिक इति माधवादिविरोधादिति भा

वः। नत्वित्संज्ञक इति। अनुनासिकपाठाभावादित्यभिमानः। उच्चारणार्थानामपीत्संज्ञकत्वमिति भाष्यमते भाविधानु

त्वमाद्यायेकानिर्देशोयमिति न नुमिति बोध्यं। अल्विधित्वादिति सघ्युपदेशादस्यानच्चापकर्षणेनस्यात्सुपदेशोऽजंनत

मस्त्येवेति। ननदर्थस्यानिवत्वापेक्षोपदेशोत्वनइत्यस्यप्राप्तेश्वनथापिउपलक्षणमिदं। मत्वासत्वायन्निमिनैवैकल्यप्र

युक्तोपदेशाप्रवृत्तिर्मग्यनेनस्यधर्मस्यशास्त्रीयस्यैवग्रहणात्तद्दोषइति बोध्यं। गुणाभावादेशयोरिति। गुणेइगंनत्वा

भावाद्ध्यप्राप्त्यापादेशाइति भावः। नसिचीति। सिचि वृद्धेर्येन नाप्राप्तिन्यायेनांतरंगबाधकत्वादिति भावः। ज्ञापनार्थ

मिति। न्यायसिद्धस्यैव बोधनार्थमित्यर्थः। नत्वपूर्वमिदं ज्ञापकमिति भ्रमितव्यं नत्वासंभवादित्यस्य च विस्तरः। इति भावः

सूर०
४३

अनुवादादिति ऋदं नधातोस्तु न तत्र ग्रहणं व्याख्यानात् कुमेर्लिडि निसाहचर्याच्च हलं तस्यैव ग्रहणं वोध्यं यणापत्ता विनिं नचन
ऋकौडिन्यायेन धात्ववयवभिन्नस्यैकारभिन्नस्यैव वाचोनिमित्तत्वमिवाच्यं। ईदृशेस्थले तन्न्यायाविषयस्यान्यत्रोपपादितत्वात्। नु
त्सन्यायेन णिचिगुणानापत्ते श्चेतिभावः। इत्युक्तेशेति। तेनसिद्धे इकारोच्चारणं नोन्तत्वेभ्रमाणमित्युक्तेशेत्यर्थः अन्यस्य येनसिद्धे
इयङ्करणं नांतत्वज्ञानार्थमित्यन्यत्। अनुहत्तेरिति। अर्थान एसंभवाच्च हलादेहैरित्यर्थ इतिभावः उच्चारणार्थ इति। अत्रा
गेनभ्रत्सयाक्षेपस्तत्र हकाररूपभ्रत्ययस्य हांनस्यचासंभवात्भ्रत्ययावयवहस्येत्यर्थः तेनवागृहरिरित्यादौ नदोषः हुस्तत्य
इतिविशेषणं तु श्रुतत्वाद्धस्यैव एवं चहस्य प्रत्ययव्यवहितत्वाद्गुदिहीत्यादौ नदोषः। अनादित्यत्र तुनधिः। हत्वस्यात्विविधित्वेनस्था
निधर्मत्वाभावेन चस्थानिवत्ताभावात्। स्पष्टं चेदं प्रकृतसूत्रेभाष्ये। अनएवपुस्मातान् जहितानुशिष्यानस्तादित्यादौ शानशो

काचूद्विर्वचनन्यायेनसर्वावयवद्वित्वंसिद्धंतथाप्यस्यद्वित्वस्यस्थानेद्विर्वचनत्वलाभार्थंपुनस्तदुच्चारणं।अन्यथाषा

ष्ठद्वित्ववद्विःप्रयोगंस्यादितिबोध्यंनद्वाह।सर्वस्येतिस्थानषष्ठीति।तेचद्वाब्द रूपेप्रत्यासत्त्यास्थानेंतरतमपरिभाष

याचस्थानिसमानाकारपदरूपएवेतिबोध्यं।कर्मणिःषष्ठीति।एवंचस्थानषष्ठीलाभावेनतस्यस्थानित्वाप्रसक्तिरेवेति

बोध्यं।पूर्वरूपत्वमित्यादीनिर्निपाठः।प्रत्यस्तमितेनेति।अज्ञायमानेत्यर्थः।द्विवचनमनुपपन्नंस्यादिति।द्विरितिसुनं

नमेवोच्येतेतिभावः।द्विरावृत्तआदेशोभवतीत्यर्थः।द्वेपदेइति।तेचोकरीत्यास्थानिसदृशाएवेतिनदोषः।प्रत्येकंप

दसंज्ञेति।तेनाग्नेग्नउत्यादौपूर्वरूपादिसिद्धं।एकाचूद्विर्वचनन्यायस्यनुनविषयः।समुदायपदत्वेनावयवानाम

ननुग्रहात्।प्रत्येकमपिविहितत्ववुद्धिसत्वेननतदृक्षतेश्चंनचानेकपदानरत्वस्यापिसत्वेनकथमांपचसिपचसिदेव

ग्रा०२०

कृन्नेत्याद्यावेकांतरनेतिवाच्यं। विशिष्टस्यापिवक्ष्यमाणरीत्यापदत्वेनैकांतरेभवनोंविधिस्पृष्टार्थसत्वेनादोषात्। द्विः ×ति१
पच्यनेइति। द्विः प्रत्युत्पूयनेइत्यर्थः। अर्थभेदाभावादितिभावः। ननुअव्ययस्मादिति। यः परस्मातिङः सपूर्वस्मादपिभव
तीतिभावः। लक्ष्यभेदाद्वित्वात्पूर्वंप्रवृत्तत्वेपिलक्ष्येलक्षणस्येतिन्यायस्याविषयः। यत्तुप्रथमसिपः प्रकृतिमध्येप्रवेशो
ननूहणेनग्रहणाद्वितीयपचः प्रत्ययमध्यपातेनननूहणेनग्रहणाद्वासमुदायस्यपदत्वमिति। तन्न। एकैकस्यैवप्र
कृतित्वादिपर्याप्त्यधिकरणत्वेननत्समुदायमध्यपतितस्यननूहणयोगात्। नहितसंज्ञासूत्रेभाष्येस्यन्यायस्यने
दमरसोरकोरितिज्ञापकमूलकत्वोन्याशास्त्रीयमध्यपातविषयत्वाच्चपौनःपुन्यमित्यादितुकृतात्मि[illegible]कद्वित्वाद
प्रातिपदिकत्वेपिकस्मादिषुकौनत्कुतःशब्दपाठेननद्वित्वइतिज्ञापनेनसिद्धमितिभावः। तेनेति। अवयवस्यपद

आचहौ शाहौ ध्वसोरेद्धाविति। तत्रापि हा दाविस्यर्थात् पूर्वव्याख्यानेनुपरत्वातान ङिःसकृद्गतिन्यायेनैनातिना। इदं च स्थानिव
त्सूत्रे भाष्ये स्पष्टं। न चासंभवरूपविरोधाभावात्कथं परत्वेन व्यवस्थेति वाच्यं। युगपत्प्रवृत्तौ स्वस्वनिमित्तानंतर्याभावरूपासंभवसत्वात्
।नाद्दशासंभव एव च विप्रतिषेधशास्त्रप्रवृत्त्युपयोगी स्थानिवद्भावस्तु कार्यप्रवृत्त्युत्तरं न प्रवृत्तिकाले इति युगपदसंभवः स्पष्ट एवे
तिक। ध्वनितं चेदं स्थानिवत्सूत्रे भाष्ये। वृद्धिर्नेति। अकारस्य सिचूपरत्वेन विशेषणात्। अंत्यस्य तु न वृद्धिः। एपल्लोपाविति पूर्व
विप्रतिषेधेनाल्लोपेन बाधात्। इति भावः। वधहिंसायामिति स्वतंत्रस्य त्वदंतप्रतिपादकभाष्यप्रामाण्येनेदृशे विषये प्रयोगाभावा
नुमानादिति बोध्यं तत्फलमिति। पुरस्तान्मिस्याद्दौ हलाभावादिरुपं। विधिसामर्थ्यादिति। न चात्रापि स्वरूपादेरेवानुकरणं लक्ष
णवशासंपन्नं रत्वमिति न सिद्धलोपयोग इति वाच्यं। लौकिके प्रयोगे रवशोस्य स्वव्याप्यसत्वेन तदनुकरणस्य वक्तुमशक्य

शा॰र॰
४४

त्वात्कृतमत्वमयोगस्यख्यानामेवानुकरणादितिभावः स्पष्टार्थे मंरीतिराधाद्धितिसूत्रेभाष्ये। अविभक्तिकश्चेति। तेन
ऐदूदूमितिसिध्यति। हृतिन्यासेतिभाष्येसपिवोध्यं। न आपिनिंसेः प्रतिषेधोवाच्यः। निंस्सेनिंस्वेसुक्तेः षत्वंदुर्वारमितितथाच
निंक्ष्वेइतिस्यादितिभावः। तालव्यान्तस्याप्यंगीकारेनबाधकमित्यन्ये। निरनुषंगस्येति। निरनुस्वारस्येत्यर्थः। आंघद्विवचनेची
त्यत्रभाष्येऽत्वंद्वितीयेसप्तमेचभाष्येस्पष्टं। अनैमित्तिकत्वादिति। आघमप्यत्रसुवचं। उ[illegible]द्रीतेति। इदंभावेनिष्ठायांसम्यंतं
उदयकालेइत्यर्थः। उदयतीतिशेषोभवतीतिवेत्यन्ये। आविर्भावार्थकत्वादिति। नचव्यतीहारस्यानेकनिष्ठत्वात्कथमत्रसइति
वाच्यं। कालांतरस्यनरलौभेदमारोप्यतदुपपत्तेहुः। सकृद्रूतीति। अत्रयथापरत्वमप्रवृत्तिस्तथोक्तंइध्येति। तदेवमुख्यंनिषे
धापवादत्वादिति। अोर्डित्वेपिनहिकार्यमीतिन्यायेनतन्निमित्तनिषेधाप्रवृत्तेः। अतएवव्यत्यगोतीत्यादौगुणइतिभावः। म ४४

ङ्क्ते॰ति। अयजुसीनियकारप्रश्लेषेण अयकाराद्दोजुसीत्येवं रूपमित्यर्थः। भंक्तेत्यस्य सूत्रं भंक्ते इत्यर्थः। ऐतेनेति॰ तस्मिन्हि परत्वेन लोप
वाधित्वा युक्स्यादिति भावः। ईहल्यघोरिती त्वं स्यादिति। ईहल्यघोरित्यातो हलीत्यनुवर्तमाने तदपवादभूतमिदं दरिद्रस्येती त्वं स्या
दित्यर्थः। केचित्तु परत्वाल्लोप इति माधवोक्तमसंगतं। अंगसंज्ञासापेक्षलोपापेक्षयानन्निरपेक्षजुसोऽन्तरंगत्वात्। तस्माद्यदिवि
कल्पस्यानिष्टत्वे दृष्टान्तरं मानं नदाद्यपूर्वप्रतिषेधेनैष्ट्यैव स्थित न विभाषा वानो चेद्धि कत्वे इष्टापत्तिस्तत्सर्वं माधवइत्युक्तपाय
निनमित्याहुः। इत्यदादयः। अन्नत एव मा तत् इति। लुग्विकरणपरिभाषा निरनुवंधकपरिभाषाभ्यां माग्रहणेनादादिकस्यापि
ग्रहइति भावः। निचायं शब्विकरणएवास्तु मानइत्यादावदुपदेशात्परत्वेन सार्वधातुकानुदात्तत्वापत्तेः ग्लानेइति। इदं चायम
दादावितिहरदत्तादिमते। लुङि॰सिचलुक्यधातामित्यादावीत्वं नेत्यपि वोध्यं। नतु दधेति। शपाव्यवधानाद्व्याख्यानाच्चेति।

ग्रा॰र॰
४५

भावः। अस्याख्यानत्वादिति एतदुपपन्नं भेनैवेति शेषः दीर्घीभवत्येवेति। चखंसे इत्यत्र दीर्घाभावाय पङ्क्तिसाहचर्येणेति ङः मित्वस्य
लादेर्ग्रहणस्यावश्यकत्वेनेदं चिंत्यं। इति जुहोत्यादयः। नियम इति। स्यादयश्च नत्रोपसर्गात्सुनोतीत्यादिसूत्रस्थाः सिनोत्या
चीना एव गृह्यंत इति सिनोतस्तरेस्मिन् षत्वव्यावृत्तिः स्यादिति भावः। अनुवृत्तेरिति। एवं च आकुसितात्त्वेत्स्यादीनामेवेति नियमे
वेति नियमेत्र नियमस्य सजातीयापेक्षत्वात् स्याग्वर्तिनामेव स्यादिभिन्नानां तेन व्यावृत्तिर्न परभूतानामिति। अभ्यासस्य प
रिति विभ्य इति षत्वं भवत्येव। एतच्च सुविनिर्दुर्भ्य इत्यत्र भाष्ये स्पष्टमिति भावः। अनित्यत्वज्ञापनार्थमिति। अन्यथा सेसि
चीति विकल्पितेट्त्वात् यस्य विभाषेत्येव सिद्धे श्वीदित इत्येतत्सूत्रं निर्व्यर्थमेवेति भावः। अस्य यविषयत्वादिति। यद्यपीदं भूवादि
योरिव ओत्सूत्रस्य भाष्यविरुद्धं। तथापि अत्र सहेः पाठो हरदत्तसंमत इति विवक्षितेर्थे न दोष इति भावः। उभयोर्ग्रहणे इ

ऽव्याख्यानमेवशरणं। महद्भिरित्तितीषेनि सूत्रे इषेः स्यन्नुमस्य यानकारे प्रतिषेध इति वार्तिकात्सहेः स्यान्विकरणस्येड्वि
धौ ग्रहणं भवत्येव इषलुभादेरिव सहेरप्यकार उच्चारणार्थ एव षत्वविधावप्युच्चारणार्थत्वे बोचित्वनेस्यन्नो। ईडोनुकरणे इ
ति। येधुसंज्ञासूत्रे ईदेदूद्धेदमनुकरणनिर्व्यवस्थाप्यम[illegible]कृतिवदित्यतिदेशा ईतेमितिके अत्वे चतुर्णां रूपाणां हस्वो धात्रूप
योर्[illegible]रेकशेषं कृत्वाद्द इति वदन्ति तन्मते नेदं। परं त्विदमसंगतं प्रकृतिग्रहणं शिरर्थकं तत्र्येप्रणिधयति इत्यादौ नेर्गदे
णत्वं यथा स्यादिति वार्तिकोत्थानानापत्तेः। ईडः प्रतिषेधः स्याघ्वोरित्वे इति वार्तिकानुत्थानापत्तेश्च। तस्मात्कृतात्वदाधामेवा
नुकरणं सूत्रे कृषिनात्पर्यस्य कृषिवार्त्तैरेव निर्णेयत्वात्। तस्माद्यत्रस्याघ्वोरितिसन्निपातपरिभाषया वारणीयमिति कृन्मेनं
नसूत्रे भाष्यस्यघं। एवं च प्रणिदापनेत्यादौ नेर्गदेति णत्वं भवत्येवेत्यन्यो। सीरदेवादय इति। अत्रारुचिर्भाष्यानुक्तत्वं। इति वि

ग्रा॰र
४६

हितेनेति। अर्थाभावेपि सौत्रत्वात्मकृनेसाधुनेत्यर्थः तत्रा त्वादिराघषीयश्च निरनुबधो लीधातुः परस्मैपदी। अयमात्मनेप
दीति बोध्यं। स्यादिष्वेवेति। अनिणः परस्य सस्येत्यर्थः। तुहाद्वाविति। चुरादौ त्वत्र हसोपधइति वक्ष्यति। अर्थस्येतीति। अर्थ।
स्योक्त्यनीत्यर्थः। अऊ बाधनार्थमिति। तदर्थम पूर्वविधिरेव स्यान्न नियम इत्यर्थः क्त इति। सिद्धेयघणीति शेषः। किंतु इति।
तथापीत्यर्थः। कर्मणीति। कर्मव्यतिहारे कर्तरि चेत्यपि बोध्यं। इष्यते च सिजिति। अन्यथा समश्लिक्षतेत्यत्रान न इति प्रषेधा दृष्टा
दृश्यो नस्यादिति भावः। ह्येट इति। स्वार्देरिति शेषः। ननु नशीक्विन्नत्य यस्य कुरिति वक्तव्ये पृथक्सूत्रकरणेनैव विकल्पलाभे वे।
ति कथं नं योगविभागे मस्लिति नित्यकुत्वार्थं कुत्वेन च महाप्राणत्वा नु।धोन आह। किंचेति। खस्यादिति। अघोषमहाप्राणरूप
प्रयत्नांतरतम्यादिति भावः। जातस्य कुत्वस्यासिद्धत्वादित्यपि बोध्यं। नञ्चाप्येति अस्य निवृत्तीति सूत्रे ऽस्य निग्रहणमात्मनेपदा

४६

इति दिवादस्य॥ अभ्यासनिमित्तेति। अभ्यासाश्रि
र्थं पुषादित्वादङ् सिद्धेरिति भाष्येउक्तमिति भावः। लुङि चाङ् विशेषउक्त इति पाठः। इति दिवादस्य॥ अकर्मकस्यैवेति। हिंसानुशाणवियोगानुकूलव्यापार
नम्रस्यांगास्थिमत्स्यपयोः प्रत्यासत्त्यायत्रैकं तत्रैवास्य प्रवृत्तिरिति भावः। अन्यथा तद्विषय
त्वात्सकर्मिके इति भावः। न च कर्मकर्तरि तत्संभवः। कर्मकर्तृप्रक्रियायां लेखस्यौचित्येपि दिवादाववौचित्यात्। अन्यथा तद्विषय
शास्त्रां तराणामपि तत्र तत्र लेखापतिरिति दिक्। इति स्वादयः। स्यानि देशाएवेति। तस्यैवोपस्थितत्वादिति भावः। तदाह। देशोत्या
दि। नारद्वाजीयास्त्विति। अत्रारुचिवीजं तु शावादेशाः स्यनादय इति भाष्योक्तपक्षे स्नमाशपो निवृत्तेरिवशेपधयोर्निवृत्तिसिद्धेलो
यपशानुवृत्तिर्व्यर्थागौरवावहाचेति। रसरन्यतरेति। रस इति षष्ठ्यंतं तत्तध्वनयन्नाह। संघातस्तस्येति। समुदायस्यस्यामित्येतनि
ईश्शादलोत्सस्येतिन। न वक्तव्य इति। अकारविकल्पस्तु वभज्जेवभ्रज्जेत्यादौ चरितार्थ इति भावः। इस्यादिस्यादिति। अभावेऽ

शा॰ र॰
४७

संयोगात्परत्वेन [illegible] किन्त्वेन गुणप्राप्तेरिति भावः। संप्रसारणस्य तु नात्र प्राप्तिः संयोगात्परत्वेनाकित्वात्। ततः कित्वा
दिति इकः समीपहलः परत्वाभावेनाकित्वान्नात्र संप्रसारणप्राप्तिरिति भावः। कित्वादिति। संप्रसारणप्राप्तिरुक्तयुक्त्यैवेति
भावः। न च सन्निपातपरिभाषयैव न दोषः शब्दतोऽर्थतो वास्याकित्सन्निपातलक्षणत्वाभावात्। अत एव भ्रस्जादेशात्सं
प्रसारणं पूर्वविप्रतिषेधेनेति भाष्यं संगच्छते। इत्यपि स्यादिति। ऋत्वस्यैवैकल्पिकत्वादिति भावः। चत्वारो दोषा इति। वरीभ
ृज्यतेभ्रज्यात् इत्याद्यै नित्यत्वात् जरूपश्रवणार्थं ऋभावात्संप्रसारणं विप्रतिषेधेनेत्यस्यावश्यकत्वमित्यपि बोध्यं। धनि
तचेदं सर्वथा पूर्वविप्रतिषेधान्न मुच्यामह इति भाष्येण। किंच हरइनोऽभ्यासोऽसंगतः। ऋ अम्पनरस्यामित्यत्र यणि
रसरित्यस्य हशि च स्तुलेरसोरन्यतरस्यामित्यस्य वैचित्यात्। अनभ्यासत्वाभावादिति। यङ्लुकि द्वित्वे कृते साभ्यासस्ये

४७

वार्थवत्त्वेन धातुत्वाङ्गत्वयोः समुदाय एव सत्त्वेन समुदायस्य भ्रस्जादेशे स्थानिवत्त्वे न तत्त्वाभावादिति भावः। अत एव हंहेर्नेर्य उ-
लुकि वध्यादिनि माधवादिभिरुदाहृतं। अभ्युपेत्यापीति। साभ्यासत्वस्याशास्त्रीयत्वेनातिदेशाभावादिति भावः। अपि नाऽहवि
श्री ३ बोधिना। नहीजं त्वस्येतलॅणस्येति न्यायेन द्वित्वप्रवृत्तिर्दुरुपपादेति। दुर्वार इति। द्रुपधत्वादिति भावः। ननु अन्तरंगे गुरुत्वादि सं०
पु[illegible]वद्द्विर्भूनार्धधातुकनिमित्तभृज्जभावं वहिरंगत्वेनासिद्धत्वान्नायं दोषः किंच उत्तरत्वं उस्यैवार्थवत्त्वमभ्याससत्तु साधु २५
स्म ५ त्वार्थ एवेति दृश्यते रिति सूत्रस्य भाष्यसंमतत्वं इत्थं तु नरखट्टैवादेशो न समुदायस्य। यङ्लुकि वध्यादिस्यपि माधवोक्तं चिं
त्यमेवं न सिध्यं नरं गमितिनुनास्सेवेत्युक्तमिति चेत्तर्हि मा गुक्ताश्चत्वार एव दोषा अत्रापीति बोध्यं। अरे वेति। लुङि वद्द्विर्भू
ति।असिद्धत्वादिति।परत्वेनाचोञ्णितीतिवृध्याबाधाच्चेत्यपिबोध्यंटिलोपोनेति।प्रकृतिभावादितिभावः।इतिईत्वमिति

351

शा॰र॰
७५

अनिर्देशेन भत्वात्। अचूशब्दस्य अणूपत्वाच्चेति भावः। इदमीत्वमाह। पूर्वमनरं गत्वादिति बोध्यं। अमुमंचयतीति। ससन्ये
नेत्यनुकर्षः बलिं बंधयतीति। इदं हे तुमतिचेत्यत्रस्य ष्टं भाष्ये। मुशब्दस्येति। न हि सिद्धत्वे हि हशब्दस्याद्रिः प्रयोगः प्राप्नोतीद्
ष्यनेनमुशब्दस्येति भावः। विहितत्वादिति। भूमावस्येति शेषः स्यष्टएवेति। न चेष्टरूपनिमित्तवैकल्यमात्रप्रयुक्तटिलोपा
घुपदेशाप्रवृत्तावतिदेशस्य चारितार्थ्ये न सन्नियोगशिष्टन्यायेनापि बोधितामाशौनव्यापारे मानाभाव इति वाच्यं तत्रा
पि प्रवृत्तौ बाधकाभावात्। उपदेशाप्राप्तावतिदेश इत्येव नियमः। न त्वेकनिमित्तवैकल्यप्रयुक्ताप्राप्तावेवेति मानाभा
वादिति दिक्। नदेनदिति। वहयतीत्यस्यारुचिप्रसक्तमित्यर्थः। इत्यर्थादिति। नाग्लोपीति निषेधस्तु न प्रधन्निति नित्यत्वा
न्नोत्पभिमानः सदृशालाक्षणिकश्रीशब्दानुगिचित्रीसदृशीशोभावत्वेनाकरोदित्यर्थ इत्यन्ये। असरत्वजदिति। न

७५

352

न्विदिदमयुक्तं णौ चङीति सूत्रे नाग्लोपीत्यस्याहारग्रहणस्य वृद्धेर्लोपो बलीयानित्यर्थे ज्ञापकत्वं वदतो भाष्यकृतः प्रा
माण्यादिकारोपधाणेरभावस्य कैयटाद्युक्तत्वात्। न चैकारैकारान्ते लोपस्यस्यानित्वादेव ह्रस्वाप्राप्तौ ऋकारग्रहण
वैयर्थ्यं ज्ञाप्यं सौरिवादइति वाच्यं। चङ्परनिर्ह्रासस्यानित्वनिषेधादिति चेत्सत्यं किन्तु शास्त्राणिचि विन्लोपेन गृहीतेति
वृध्यभावेन नाग्लोपीत्यस्य प्रवृत्तौ फलाभावेन ज्ञापकस्य सुस्थत्वात्। इत्तो णेरभावे हि लुग्विधायके विन्ग्रहणं व्यर्थमे
वस्यात्। विन्विषये मतोः सत्वेन न लुकैव स्रजिष्ठ इत्यादिसिद्धेः। विन्नन्तानां नेष्ठनादिरजादी गुणवचनादेवेत्युक्तेः। अत्रान
रंगत्वात्पूर्वं जातस्य मत्वस्य णिलोपेप्यनिवृत्तेर्नैकुत्वमिति दिक्। गोमन्तमजुगावदिति पाठः। अचो ञ्णितीति वृद्धेर्दुर्बी
रत्वात्प्रापयनीति भाष्योदाहरणेन दर्शनात्। स्रजयतिन्यायेन वृध्यभावेन तु ह्रस्वपाठोपि सूपपादः। असिस्रजदि

ग्रा·र·
७६

स्तुतरमपपस्यदिति पाठः। पयसत्रा द्वाणि अग्लोपित्वात्। सिद्धांतइति। दृवयतीति दरिति सूत्रे भाष्ये उदाहरणात्। अत
एवादेशोनरमुपधावृद्धिरपिनेति भावः। वारयतीति। वरयतीस्तुविनं दृवयतीति वत्। इतिनामधातुप्रक्रिया। स्वार्थेकइ
तितेनेभ्यः क्विप् इत्यतइति भाष्येण यगंतेभ्यः क्विबभावात् घयउं नेभ्यः क्विपेहं सिद्धमितिनशंक्यमित्यर्थः। कन्नर्थे इति।
करणइत्यनुवर्तनेइतितद्भावः कृत्यर्थाविवक्षायांकंडूमित्याघपीतिननास्यर्थे। नत्रानिपदिकान्येवेति तानि चफलांशामा
त्रार्थकानीति भावः। अल्लोपासंभवेनेति। आर्धधातुकत्वाभावादिति भावः। दृगिति। दृगर्थस्तु यदर्थं इतं नामधातुष्वित्येवसि
द्धकंडूादेस्तनीयस्येत्वस्यनियामकत्वापत्तेर्गौरवं। ममममनुविध्यर्थत्वंस्य मेवानाम। शब्दस्य सुबंतपरत्वेतु नदृभाष्या
मूलविरोधः। किंचकंडूरित्यादौसत्वभूतार्थाभिधानानुपपत्तेः समभिव्याहारेचासत्वभूतार्थाभिधायित्वादर्थभेदेन शा

७६

दमेदाञ्चदैविध्येएवपर्यवसानं। दूषितमिति। हतावर्थनिर्देशरहितगणपाठे ऽसुलेट्लोट्लेलाइत्येवपाठात् दूषितमिति भा
वः। इतिकंडूादयः। अत्यपमालाच। परस्परकरणमपीति। अपिनाऽन्यकर्मणोन्येनकरणसंग्रहः। उत्तरार्थमिति। भावकर्म
मिति। भावकर्मणोः सामान्यसूत्रेणैवसिध्यासामर्थ्यादेवास्यकर्तरिप्रवृत्तिःसिद्धेतिभावः। पत्वनिषेधइति। अत्यसकार
त्वादुपसर्गप्रादुर्भ्यामितिवत्वमपिनेतिबोध्यं। एकदेशेति। अपरेशिवद्भावेनपरत्वमपिसुलभं। अर्थग्रहणसामर्थ्या
दिति। गतिहिंसयोरित्येवनत्ववर्तमानेभ्योधातुभ्यइत्यर्थेनेष्टसिद्धेरितिभावः। वहेस्त्विति नियाप्युपलक्षणं। अजाग्रामा
दिसंयोगानुकूलदेवदत्तादिनिष्ठोव्यापारोवत्यार्थः। गतिस्तुग्रामादिसंयोगानुकूलः। कर्तृनिष्ठोव्यापारइत्यगत्यर्थत्व
मितिभावः। आक्षेपादिति। नव्यापारमात्रेणाजाव्यापारंविनाऽजाग्रामसंयोगासंभवादितिभावः। नकश्चिद्दोषइति।

शा.र.

७७

यद्यपिस्याद्योपितावस्थायांतथापिपरत्वाद्देवअर्थेऽगसंज्ञापेक्षत्वव्यस्याद्दीर्घानुसंज्ञापेक्षत्वेनसमत्वात्।कृताकृतप्र
संगित्वमात्रेणशस्त्रंनरस्यमित्वत्।शस्त्रंनरणस्यास्याचनित्यत्वात्।अनित्यताचोभयोःसमा।वार्तिकमस्तीति।नेरितिषष्ठीपरि
अवेभ्यइत्यादावपिषष्ठ्यर्थेपंचमीत्यपिभाष्येस्पष्टं।इत्यादेरिति।आदिनाविभाषाकर्मकादित्यादि।तदेवंयथ्येनचपदांत
रसंबधनिमित्तकार्येपदसंस्कारपक्षानाश्रयणंज्ञाप्यतइतिभावः।अत्रस्मतावित्ति।स्मरणपूर्वमादृतानीत्यर्थः।सि
द्धत्वादिति।नचनियमार्थं।विधित्वौचित्यात्।सादृश्यमात्रमिति।एतत्सूत्रदृतार्थेस्यत्रभाष्येस्पष्टं।ननुशपथइती।ए
तद्धत्यनुरोधेन।भाष्येशपउपलंभनइतिपाठात्।उपलंभनंप्रकाशनमितिकैयटाच्च।साहचर्यादिति।व्याख्यानसहकृतादि
तिभावः।तादृशोनहिलुग्विकरणपरिभाषाबाध्यते।अतएवभाष्येसंवितेइत्युदाहृतं।किंचवेतेर्विभाषेभाषेनिरुद्धिधाने।

७७

356

नचैतेनात्मनेपदमावश्यकं तत्राहि निर्देशादेव लुग्विकरणग्रहणमितिभावः। अनन्वयः शंक्य इति। सहसाप्रवृत्तिरेव प्रकु
रुते इत्यस्यार्थस्तत्र च समम्युचितेनिभावः सहसेत्यस्य बलात्कारेणाविचारेणैवेत्यर्थः। क्रमिर्ईष्ट्य इ।उ ऊममात्रेऽकर्मक
त्वमितिभावः नत्रायमिति। अन्नि एव व्यवहारे स्परस्परकरणरूपे कर्मत्वव्यतिहारे चेत्यर्थः। नन स्वीकारमारमात्रे इति।
।अत एव इह कस्मान्न भवति स्वं शाटकानुपयच्छती भाष्यं संगच्छते। णोरणौ। क्रियापर इति। उत्तरवाक्येनाणौ कर्मणः कर्त्व
र्तृत्वविधानादितिभावः। ननु कर्मपदस्य क्रियापरत्वे कर्मवत्कर्मणेत्यस्याग्रे णेरणावनाध्याने इत्येव सूत्रणीयस्यादणौ कर्म
स्य क्रियया तुल्यक्रियः एव कर्ता एवं ते कर्मवदिति सूत्रार्थ इति चेन्न। चिन्त्यवदित्येव्याप्तेः। सैव चेदिति। सामर्थ्यादेव कारला
भः। अध्यारोपितमेणाढ्ढीनीयकस्यायामधिकस्रवेरोपितत्वनाया अस्यसा वाक्य। स्यैव वैयर्थ्यापत्तेः। अनुवर्तत इति। य

पैगपु निस्तुनः हेतुमति ग्निश्चि भ्रूआमि निधाति के नतनि षेधात् इत्नु णेरणौ
यनिशाध्याने इति न्यासे न इति आध्याने यकर्मवि द्वागेने स्पर्धके नेडुधारयि तु राकचः
राद्याधिकारमाक्षि स्यकर्तृस्यक्रिया णामप्यत्र ग्रहणं सुवचं दर्शयते राजेति भाष्यप्रयोग
श्वराद्याधिकारेमानं अत्र न्यासे कार्यातिदेशोऽणाय कर्मकाद्भिमाणे पपदेतस्य नयोर्विब

ग्रा.र.

७८

घप्येकयोगे नानुवृत्तिरिति इक्को गुणोऽस्त्र भाष्ये उक्तं नयाप्यत्र वाक्यभेदस्सत्वात्स्वरितत्वसामर्थ्यादाकांक्षावशाच्च संबंध इति
भावः भाष्योदाहरणमिति। न चायं भाष्यप्रयोगः क्रियाफलस्य परगामित्वे एवं च कर्तृगामिनि क्रियाफले परत्वादणेव कर्मके
स्यस्य प्रवृत्तौ न किंचिद्बाधकमिति वाच्यं। न ह्ययं भावस्य कस्य परगामिन्यपि परत्वात्प्रवृत्तेर्दुर्वारत्वात् नहि कर्त्रभिप्राये इति
।नत्रानुवर्तने फलाभावादिति भावः नचाण्णो कर्मकादित्यत्रोद्देश्यतावच्छेदकावच्छेदेनान्वयस्य व्युत्पत्तिसिद्धतयाऽण्यं
नावस्थात्वावच्छेदेनाकर्मकत्वप्रतीतेरत्र तदप्राप्तिः। राजानं पश्यतीत्यस्या अपि नदण्यं नावस्थात्वादिति वाच्यं। सामा
नाधिकरण्येनान्वयभ्रमवारणाय तदंगीकारादित्यभिमानः। विभाषोपपदे इत्यस्य विषयेऽस्यैव प्रवृत्तौ इदन्तरमानस
त्वेन द्विषयो वाचनिक एव स इति बोध्यं। अन्यत्र भावक्रिययोः पर्यायत्वदर्शनादाह। अपरिस्पंदेति। विषयत्वापादनं

७८

विषत्वापत्त्यनुकूलो व्यापारः अंशद्वयेति।फलव्यापाररूपेत्यर्थः।न च चतुर्थकक्ष्यायां फलमात्रवाचकत्वेनाऐंगक्रियेत्यं
शाभावेनोदाहरणत्वानुपपत्तिर्धात्वर्थस्यैव तत्र क्रियात्वेन ग्रहणात्।स्वद्रत्रापि तत्समानाधिकरणव्यापारमतीरस्ति अं
शद्वयेत्यस्य व्यधिकरणांशद्वयेत्यर्थः।निह्नतविशेषणं।स्वकविशेषणधात्वर्थफलाश्रयं।स्वाक्रियावयवे।स्वनिष्ठकर्मतानियामक
धातुवाच्यैकदेशे फलरूपे तत्समानाधिकरणव्यापाररूपे वा आधेयतया स्थितमित्यर्थः।निवर्तमाने इति।प्रकृतधात्वर्थव्या॰
पारव्यधिकरणफलाश्रयत्वाभावादिति भावः।अवतिष्ठते इति।प्रधानभूतधात्वर्थाश्रयत्वादिति भावः।विषयत्वापत्तिमात्रेति।
तत्समानाधिकरणव्यापारवाचकादित्यर्थः।न्यूनाधिकभावेति।विनिगमनाविरहावकारेण।भयोरपि व्यवच्छेद इति भावः।एव
कारस्यान्ययोगव्यवच्छेदपरत्वादाह।अधिकेति।एवं चाएयंनावस्या वाक्यद्वयेऽपि समत्वासस्यैकैकवाक्येति वादिनां मतेऽपि नद्दो

४

ग्रा॰र॰ ७१

षः। न्यूनत्वमात्रस्यावच्छेदकत्वस्तु नोक्तः असंभवात्। अध्यारोपितमेषणाद्वितीयकक्षायां सूत्रस्य दुर्वारत्वावच्छेदकवाक्यवैयर्थ्या
पत्तेश्च कर्मत्वावस्थायां कर्मनिष्ठफलव्यापारयोरुभयोरपि धातुवाच्यत्वेन कर्मकाणां शब्दस्याभिधायकत्वेपि नाधि
क्यमिति बोध्यं। आधिक्यमात्रस्यावच्छिद्यते इति। एतदेवस्याप्यमित्युक्तं। नन्वणाविस्तस्य श्रुतत्वेपि यथा वाराणसीस्यो
वरो मथुरायामस्ति चेद्विवाहो भवतीत्युक्ते विवाहाधिकरणत्वं मथुराया एव प्रतीयते न तु श्रुताया अपि वाराणस्यास्त
था अणौ यासाणौ चेन्नु क्रिया तत्र यत्कर्म तच्चेणौ कर्ता इत्युक्ते एणं तत्राधिकरणत्वमेवात्मनेपदस्य प्रतीयते न त्वण्यन्ताधि
करणत्वमत आह। किं चेति। णौ कर्मत्वं प्रतिपाद्यते इति। अणौ हि कर्मकाणामेव उदाहरणत्वसंभव इति भावः कर्तृत्वप्र ७१
तिपादनादिति। अणौ यत्कर्म सकर्मकेनेति वाक्ये उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयस्यौत्सर्गिकत्वेन कर्मत्वाव

छेदे कर्तृत्वविधानेन कर्मसकर्तृत्वप्रतिपादनस्य कर्तुरशक्यत्वेन कर्मणो न रतिनिष्ठ निपरत्वस्य वक्तुमशक्यत्वादिति भावः। अ
तो कर्तृत्वादिति। कर्तृकर्मणोरकर्मभावस्यैव भवनाविवक्षितत्वादितिभावः। ननु स्थलरूपमत्राधिकं कर्म। तस्य मूलभूताः
एतन्नावस्था मनुष्य आरोहयमाणं हस्तिनं आरोहयन्तीत्येवसौ कर्पानिज्ञाय प्रतिपादनाय प्रेरणावृद्धिवन्तूनत्वनिपादना
येव फलं शाब्दबोध्यादि कर्मकत्वकरणात्। एवं चोर्ध्वदेशावच्छिन्नतस्यैव वस्तुनः उभयसंयोगानुकूलो व्यापारो धात्वर्थः। स्थलशब्देन
गजपृष्ठस्यैकाग्र्यमुपवेशनस्थानमुच्यते। आरोहन्ति हस्तिनं हस्तिपकाः। इति त्वारोहयमाण इत्यस्यैव मूलभूता
आरोहयमाण इत्यस्य सूत्रोदाहरणप्रदर्शनं। दृष्टान्तार्थं हस्तीति मध्यमणिन्यायेनोभयान्वयि। यथा तत्रानेनात्मनेप
दं ज्ञापनेन तथात्रापि स्यादिति प्रथमम् अघटकाशयइति चेन्न। मनुष्याः स्थलमारोहन्तीति तन्मूलाप्यन्तावस्थाप्रदर्शनप

रतघ्याख्यानग्रंथविरोधात्। इत एव वास्तरसाराहद्धृतीयोपीति। एवं च सकर्मकस्थले कर्मवद्भावाप्राप्त्यानेन सिद्धमिति मध्य
मविरोधः स्पष्ट एव ननु अध्यारोपिन शेषणान्तनीयकस्यायां कर्तुः समानधातौ कर्मस्थक्रियया तुल्यक्रियत्वाभावेन कर्मव
द्भावाऽप्रवृत्त्या कर्मकर्तृत्वात्सिद्धमित्यसंगतं। कर्मवत्कर्मणेत्यत्र प्रत्यासत्त्या यत्र धातौ यस्य कर्तुः कर्मवद्भावस्तस्मिन्धा
तौ कर्मस्थक्रियया तुल्यक्रियत्वग्रहणादिति चेन्न। निर्हृतशेषणपक्षमाश्रित्य नत्स्रवृत्तिसंभवात्। हस्तीत्यगभवनीत्यर्थे
वृद्धेकश्चिद्धस्तिनंत्यग्भावयतीत्यस्याप्यर्थस्यनिष्पन्नतयाभावेन तदर्थबोधकशब्दमात्रोपस्थितौ वयमेवग्नास्योयंने
ति अत्र विनिगमनाविरहात्। नहि पक्षद्वयमूलकः प्रयोगोन्यतरपक्षमाश्रित्यैवोपपाद्य इत्यत्र मानमस्तीत्याशय इत्यन्य
त्र विस्तरः। अत एव नेति। कर्मवद्भावाप्राप्तेरेवन्तनीयोपि सघट्टकस्तवनाविरुद्ध इत्यर्थः। किं चेति। मनुष्यास्त्यालमारो

हंतीति तन्मूलाण्यंतावस्थाप्रदर्शनपरतयाख्यातग्रंथरीत्येदं। यत्तग्रहणमिति। अणौ यत्कर्म स चेण्णौ कर्ता इत्यर्थे उक्त
त्वानियामकत्वेन न ह्युभः। कर्मव्याप्येक्रियायां च पुन्नपुंसकयोर्मतमिति निरुद्धकोशान् कर्मशब्दः पुंस्यपि। ननु स्थल
मारोहंतिमनुष्या इत्यण्यंतावस्थायां कर्मणः स्थलस्य णौ कर्तृत्वाभावात्। कथमत्र प्राप्तिरित्यत आह। णिचेनेति। प्रा
प्तिरेव नास्तीति। नियतोऽस्थितनयोदाहरणभूत एयंतमूलस्यैवाण्यंतस्याणाविवत्यनेन ग्रहीतुमुचितत्वमिति भावः। किंच णि
त्वेनैकत्वं गृहीत्वाऽन्यत्रणौ कर्मणोऽणौ कर्तृत्वप्रतिपादनार्थं णौ कर्मातिरिक्त कर्मसत्तापि सर्वत्र वक्तुं शक्येत्यारोहयमाणड
त्यत्रात्मनेपदाप्रसक्तिरित्यपि बोध्यं निर्विषयतास्यैवेति। यत्तग्रहणमन्यकर्मार्थमित्यनेनैव हरदत्तोक्तेऽहृत्युक्ते च आत्मने
पदवारणे सिद्धे समानक्रियत्वबोधकवाक्यवैयर्थ्यापत्तिः। ननु तत्र क्रियाशब्दो धातुपरस्तेन धातुभेदे प्रवृत्तिर्नेति वाच्यं।

ग्र॰र

८१

कर्मवत्कर्मणोप्यस्येवास्यापिधानुभेदेनस्यासत्त्वेनवारणासंभवात्।धात्वंनरघटितकथ्यायास्तन्मूलत्वाभावाच्चेत्यपिबो
ध्यं।उक्तरीत्येति।समानक्रियत्वाभावादितिभावः।द्वितीयकक्ष्यायामतिव्याप्तेरिति।मध्याख्यानरीत्याप्रथमघटकस्यभाव्या
द्याहृत्योप्यतिव्याप्तेरित्यपिबोध्यं।भक्तेति।कर्मान्तरनिवृत्ति।परत्वयापिव्याख्यानइत्यर्थः।एवंप्रयोज्येति।तेनाध्यारोपितमे
षणपक्षान्तनीयकक्ष्यायांनदोषइतिनकूयेस्पष्टं।द्वितीयवाक्यार्थइति।समानक्रियत्वघटितइत्यर्थः।अध्याहारःप्रति
पाद्यवस्तुइत्यादेः।व्यवहितान्वयः।श्रोणीयदित्यस्यव्यवहितस्यश्रोणीचेदित्यन्यत्रान्वयः।अन्यथेति।तदुपपादितंशाक।कु
त्रस्यश्वेति।अध्यारोपितप्रेषणपक्षएवनैतस्यथोकेरितिभावः।परस्परव्याहतमिति।एतदेवात्रदूषणंसारं।निष्फलतायाउ
तिस्थिलमारोहयतीत्यादेः समानक्रियत्वाभावेनैववारणात्।निष्कर्षइति।मद्रीत्येत्यादिः।प्राथमिकबोधमादायेति।ल

८१

क्षणा तात्पर्यग्राहकनयेत्यपि बोध्यं। स्वार्थकेति। प्रयोगसार्थकेत्यर्थः॥ [illegible]चः कर्मपदस्य चेति। णिजंतस्य ज्ञानविषयो भवती
त्यर्थे लक्षणया णिजंतपदमात्रावश्यकत्वात्। एवं णिजुक्तनये दर्शनानुकूलव्यापारनिष्ठव्यापारविषयाभेदेन णिबोधस्या
त्मनेपदस्यावश्यकत्वेन न दभिप्रायेणैन मित्यस्य प्रयोग इति भावः। स्वज्ञाप्येति। वाक्यज्ञाप्यवाक्यार्थसंबंधेत्यर्थः। भृत्य
कर्मिका राजकर्तृकादर्शनविषयाभेदेन स्वार्थकस्य वाक्यस्य स्वार्थसंबद्धे राजकर्तृकदर्शनविषयीभवनमित्यर्थे लक्षणेति
भावः। भृत्यादीनां। दर्शयते राजेत्यादिलक्ष्यस्य कर्मरूपाणां। शुद्धाभेदेनेति द्वितीयकस्य यासहास्यं तमर्थाभेदांगीकारादित्य
र्थः कर्मवाक्यस्य उदाहरणभूतकर्मघटितवाक्यस्य। तादर्थ्याश्रयणात्प्रयमबोधार्थत्वाश्रयणात् [illegible]विशेषेति उत्कं
गपूर्वकस्मरणरूपविशेषेत्यर्थः। उच्चारणवृत्तिरिति। असदुच्चारणवृत्तिरित्यर्थः। अत्रात्मनेपदं तात्पर्यग्राहकं। अनए

शु॰ र॰

८२

वनिस्यवीसयोरितिह्रिलंन।स्मरतेरिति।मित्संज्ञकस्येतिशेषः।तेनामितःस्मारयति देवदत्तेनेत्येव।नयागफलमिति।श्रु
त्यालोकनोवायदुद्देशेनयागपाकादिप्रवृत्तिर्बोध्यतेनत्फलमितिभावः।प्रसिध्यर्थे।प्राप्त्यर्थे।हेतुकर्तृपरत्वादिति।अभिप्रा
यः प्रेरणाक्रियारूपफलगतेनप्रयोजककर्तृप्रेरणाविषयत्वे द्योत्ये आत्मनेपदमितिसूत्रार्थ इति भावः।इत्याहुरिति।अत्रारु
चिबीजंतुभाष्यानुक्तत्वं किंचांतर्भावितण्यर्थनयैवतदुपपत्तौ प्रयोजकव्यापारे आत्मनेपदविधानेमानाभावः परस्मैपदेपि
पचभिर्हलैः कर्षतीत्यादौ तत्र नीतेयन्तर्भावितण्यर्थतायाआवश्यकत्वादिति।इत्यात्मनेपदं। साध्यमेवेति।आधृषीयत्वेन
पक्षेणिजभावादितिभावः।नचलनार्थत्वमिति।किंतुस्पंदनार्थत्वमितिभावः।स्पंदनत्वंचद्रवद्रवद्रव्यजन्यतावच्छेदकंचलन
त्वव्याप्यंजातिविशेषरूपमितिचलनार्थत्वमितिबोध्यं।अथकथमिति।निगरणशब्देनभक्षणमिवतपादमीतिसूत्रे

८२

पाग्रहणात्पानमपिगतार्थमिति। यद्यपि द्रवद्रव्यस्य गलादधःकरणं पानं तथापि द्रवद्रव्यस्योपलक्षणत्वेन धात्वर्थत्वाभावा
न्निगरणार्थत्वमस्त्येवेति भावः वस्तुतः पानं नाम पिपासानिवृत्त्यनुकूलो व्यापारः। भक्षणं क्षुन्निवर्तको व्यापारः सर्वेषा
मिंद्रियाणां च बुभुक्षापिपासे इत्यैतरेयोपनिषदित्यर्थः। संबोधने सुरिति। पंचमीसमासस्यानित्यत्वज्ञापनाय। ऊङ् हस्वादिति सं
बुद्धिलोप इति भावः। अणोकिमिति। न च नदद्भावे विशेषणद्वयविशिष्टानुकरणं नादित्यर्थे मूलोक्तोदाहरणे परस्मैपदानुप
पपत्तिः। बुधादिसूत्रसाहचर्येणानत्वकृतिकरणं नादित्यर्थेनादोष इति भावः। नद निरभसादिति। तस्य भ्वादौ पाठादिति
भावः। निवृत्तमेषणानयेति। निवृत्तधात्वर्थव्यधिकरणमेषणानयेत्यर्थः। समानाधिकरणमेरणया च णिचः साधुत्वमिति
केचित्। भेदस्येति। चुरादिणिच् हेतुमण्ण्योरित्यर्थः ननु भाष्येति। तत्र हि चुरादिणिच्नाड्ढेतुमण्णोः परस्मैपदमुक्तं। इति पद

श्रा०र

८३

मवस्था।।एरञ्जिति।ननएवयुत्विभावनेतिवोध्यं।तथाध्वनितत्वादिति।संज्ञाशब्दानांजातिशब्दत्वस्यध्वनितत्वादितिभावः।भा
वनामतीयनेइति।नचविध्यर्थप्रवर्तनतयासाक्षिप्यतइतिवाच्यं।विध्यभावेपितत्प्रतीतेः।नहितमादृशोविधावेवेतिनियमः।प
क्त्वेत्यादौविधिसंभावनाया अप्यभावाच्च।ननुमास्तुतत्रतत्प्रतीतिरत आहकारकेति।हेत्वंतरमाह।अस्तिचेति।तदुपपाद
यति।किंकर्तव्यमित्यादिना।पक्त्वेत्यादेःपाकंकृत्वेत्यादिविचारणाच्चेत्यपिवोध्यं।नचतत्रकर्तृकर्मभ्यांतदाक्षेपः।पक्त्वेत्यत्र
तदप्रतीतेर्दुर्वारत्वात्।किंचाक्षिप्तायांपदार्थानवगानचयापत्तिः।अन्यथाधूमोयंज्वलतीत्यपिप्रयोग्यंस्यात्।किंचतद्देवाक्षे
पेणपचतीत्यादावपितत्प्रतीतिसिद्धावनन्यलभ्यस्यशब्दार्थतयानिउँतत्रशक्त्यनापत्तेः।ननतत्रापिप्रत्ययवाच्याभावना।
नवकाष्ठैःपाकइत्यापत्तेः।कर्तृव्यापारस्त्विति।शब्दशक्तिस्वाभाव्याद्धात्वर्थसमानाधिकरणभावनैवतत्राख्यातार्थः।अ

८३

नर्भाविनएयर्थनातुनसर्वत्रेतिननदापत्तिरितिभावः।ननुनिङ्योगेनिङर्थभावनाश्रयत्वमेवतन्मतेकर्तृत्वं।नदर्थभावना
अधिकरणफलवाचकत्वंचधातूनांसकर्मकत्वं।नत्समानाधिकरणार्थवाचकत्वंचाकर्मकत्वं भावनाचव्यापारसामान्यं
।नकृतिरितिरथोगच्छतीत्यादौनदोषइत्यरुचेराह।किंचज्योतिष्टोमेति।असमत्पक्षएवेति।परमतेतुनदसंगतिःसत्यास
त्यासमर्थःपदविधिरितिपरिभाषणेनत्वयप्यर्थनिरूपितकरणेउपपदेतन्निरूपितकर्तरिवाच्येणिनिरितिनदर्थःसच
तन्मतेऽसंगतइतिस्पष्टमेव।नद्यपानांशांतरस्य।यज्युपानयागरूपस्यभाव्यतयेति।पचतीत्यादाविस्यर्थः।करणेनयेति
।शाब्दशक्तिस्वभावादितिभाववः।स्त्रीत्वस्येति।यदितत्रयावादीनांद्योतकतयाविशेषणत्वंतर्हिमकृत्तेपिनपावकुंशंकुंकं
।कृतीति।भावनेत्यर्थः।।द्विगिति।नदर्थस्तुभावलकारेकारेकर्मादिकारकान्वयानापत्तिः।तत्रापितस्यावाच्यत्वेतदन्वयेपिनिसं

ग्रा·र·

८४

रूपान्वयांगीकारेण द्विवचनाद्यापत्तेः।किंच समानकर्तृकयोः।पूर्वकाले इति सूत्रासंगतिः।समानकर्तृकक्रिययोः पूर्वकालत्व
त्क्रियायां वर्तमानाद्धातोः क्त्वेति तदर्थात् इति।न सामाधिकरण्यमिति।असत्वभूतक्रियायाः सत्वार्थकयुष्मदादिसामानाधि
करण्यासंभव इति भावः।भाष्यमिति।यकसूत्रे इत्यादिः।द्रव्यधर्मानिति।एवं च घञादिपदप्रतिपाद्यपाकादिद्रव्ये इव लिंग
दिहेतुना घञन्तादिप्रतिपाद्ये सत्वमनुमीयत इति भावः।इदमप्यव्ययकृदादिरिक्तविषयं।कृत्येषु नपुंसकेतरलिंगयो
गाभावेनासत्वव्यवहारः केषांचिदिति बोध्यं।अनन्वितास्यादिति।कारकाणामसत्वभूतक्रियान्वयित्वनियमादिति भा
वः।पचत्यादौ।पचापतेति।आख्यातशब्देनेत्युक्तं नेक्रियाप्रधानेवा।भागाभ्यां।प्रकृतिप्रत्ययाभ्यां साध्यं।क्रियाधात्वर्थः।साधनं
।कारकं सत्वयार्थः।स घञादिरिति।सिद्धत्वसाध्यत्वोभयविशिष्टो धात्वर्थो घञन्तेन वाच्यः।सिद्धत्वरूपो धर्मश्च घञ्द्योत्यस्तरा

८५

370

हृसाध्यत्वेनेत्यादि। सत्वभावस्त्विति। तथा च कर्तरि कृदिति सूत्रे भाष्ये इदं सूत्रं भावव्यावृत्त्यर्थं। न च भावे घञिति नियमान्नान्ये कृ
तो भाव इति वाच्यं। अन्यः स भावो वाच्यः प्रकृत्यर्थान्। एतद्भावे हि इमे आभ्यन्तरे स्युरित्युक्तं। पाकेन कृतमित्यादिव्यवहारस्य
स्त्रियामित्यादिना भावविशेषणाच्च। वर्धमानेनेति। द्रव्यवदित्यस्य द्रव्यविशेष्यिका प्रतीतिं जनयतीति तदर्थ इति तदाशयः
तदाह। पचतीत्यादिना। द्विगिति। तदर्थस्तु रसशाब्दस्य द्रव्यपरत्वे कर्मधारयेण तस्य पूर्वनिपातापत्तिः। रथ्यंतरादिवद्दयशाब्दस्य
रूढत्वाच्च। किंच सर्वत्र भाव एवमेवापत्तौ कर्मणि प्रत्ययविधानेनोपपत्तौ भावे प्रत्ययविधानवैयर्थ्यं चेति। भेदावभासादिति
।उपमानानां च बहुत्वेनोपमेयेनेति। उक्तेऽप्यर्थेऽपि बहुत्वारोपेण प्रत्ययः। अन्यथोपमाने बहुत्वोपादानवैयर्थ्यस्यादिति भावः। लिंगेति
लिंगाभावमादायभिन्नेति। उक्तार्थे कर्तृकर्मातिरिक्तकारकत्वाभावमादाय चासत्वमिति भावः। तनहितान्वय इति। स इद्वि

शा० ६
८५

एवञ्चेत्येवंरूप इत्यर्थः। पूर्ववाक्येन इति। उत्तरवाक्ये चेत्यपि बोध्यं। तत्रपोदाहरणं हरिः सेव्यस्तद्धक्रश्चेति। अन्त्यस्य तु कर्तृकर्म
णी। गुणश्चानिदिश्य इत्यर्थवत्सूत्रस्य भाष्यप्रयोगः। अचरितनर्थत्वादिति। सर्वथाऽचारितार्थत्वादित्यर्थः। इत्यपि प्रयोगानुगु
चितमिति। स्थायन्तेरात्रप्रयोगे इत्वः। इत्युदात्तः स्यादिति। एवं चेडुन्तस्यागतत्वाभावात्ततः परस्य प्रत्ययत्वाभावाच्च लुकोऽप्राप्ति
रिति भावः। प्रत्ययत्वाभ्युपगमादिति। एवं च तदादिग्रहणेनागतत्वमपि सुलभमिति भावः। उकस्यापीति। इङ्इवङ्इः परस्या
पिचितित् इष्टप्रत्ययत्वमिव चित्वाः परेपि इष्टप्रत्ययत्वस्यातिदेशसंभवादिति भावः। निर्विषयत्वापत्तेरिति। चिण्वदित्यस्य
कार्यातिदेशतयाऽनेनातिदिश्यमानकार्याणामाभीयत्वेन तत्रैव सिद्धत्वेऽतिदेशस्य निर्विषयतापत्तिरिति भावः। आङ्गा
इति। अङ्गाधिकारस्था इत्यर्थः। सीयुण्मात्रस्यार्धधातुकत्वासंभवादाह। तत्राचेति। विधिलिङीति। प्रसुवीतेत्ययं। तत्रहि

८५

कर्मकर्तरि न दुहेति यक्निषेधः प्रकृते च हनादि साहचर्येण जंतं धातुरूपांगस्यैव ग्रहणं। एतेन यकाभ्यवधानादस्याप्रवृत्तेनोक्त
यं विधिलिङोऽप्यावर्त्स्यत्वमित्यपास्तं। वलादित्वं नास्तीति। लिङः सलोप इति सलोपादिति भावः। निरपेक्षोऽस्यसाविति। अतो नित्यो
साविति भावः परः सामिकाः अनित्य इति। न सापेक्षत्वादिति भावः। एवं च ऋदनोरित्यादेरपि न सापेक्षत्वादनित्यत्वं बोध्यं।
तदं न तमस्त्येवेति। अंगस्य धातोर्वेति शेषः। न च एयं ल्लोपाविति पूर्वविप्रनिषेधेन गुणं बाधित्वा णिलोपप्रवृत्त्या लिघोस्यानि
वत्वाभावेनोपदेशेऽयोऽच नदं न तं दुरुपपादमिति वाच्यं। गुणात्परत्वादार्धधातुकस्येडिस्यप्राप्तानं नित्यत्वेन बाधित्वाचिएव
दिट एव प्रवृत्तेनेट्दोष इति भावः। नहि हिंसं नस्येति। भूनीप्रभृतीनामपि गुणोऽउपदेशेऽयोऽच नदं नत्वाभावाच्चेत्यपि बोध्यं। उपदेशाग्र
हणसामर्थ्यादिति। नत्सामर्थ्यादुपदेशग्रहणादपि नदं नत्वं विवक्ष्य न इति भावः। ज्ञंतं नस्येति। तदंतांगस्येत्यर्थः। उपदेशाग्र

शा॰ र॰

८६

हृत्सामर्थ्याच्छरूपविशेष्यमाशाया चान्तरंगविधिः। तेन चांगस्य विशेषणात्पुनस्तदंगविधिरिति भावः प्रकारांतरमाह। [illegible]
धिकरणेनित्यवमन्वयोपि न तत्सामर्थ्यादेव बोध्यः। [illegible]पदेशिवद्भाववहृति। तेन णिचो जं तत्त्वमिति भावः। [illegible] अस्यांतेगमेवागा
वयवस्तेन न्यायेनेति भावः कारित्यत्र तदंतांगत्वव्यपदेशिवद्भावेन। आरितेस्तत्रोभयमपि व्यपदेशिवद्भावेन। स्मारितेस्तत्रो
भयमपि मुख्यमेव। तदंतांगस्येति व्याख्याने इति बोध्यं[illegible] एवद्धुद्धिरिति। चिण्वद्भावप्रयोजनं हृद्धिरित्यर्थः। हृद्धिरंतस्य हृद्धि रु
पधावृद्धिश्च दीर्घ श्लोक इति। शामिता शमितेत्यादौ। अत्र दीर्घे चिण्वत्त्वं नासिद्धं। आभीयासिद्धत्वस्यानित्यत्वात्। [illegible] चेति।
सच प्रयोजनमित्यर्थः। दृशाधातोश्चिण्वत्त्वं नियोगशिष्टं प्रसह्य। तिरेव चिण्वत्त्वप्रयोजनमित्यर्थः। चासिद्धत्वस्य चोपस्थितत
त्वाद्धि उवगत्यने। एवं च णिलोपमात्रे यमसिद्धो नान्यत्र। अतएव तत्सूत्रभाष्यारम्भाने चेन णिलोपः साधितो भाष्ये इति।

८६

बोध्यं। चौडिरिति नचाचामादेरित्यनुवृत्त्यानिस्तारः। दरिद्राय्यके दोषापत्तेः। दद्याविति। औत्वं नूनमेणित्वाभावपक्षे चरिता
र्थमिति भावः। असला दित्वादिति। इकोऽसलित्यतस्तनुवृत्ते रिति भावः। अननुवृत्तावप्याह। सस्यपीति। विशेष इति भाव
इति। वाक्यार्थबोधकाले वाकाभावेन हनेरपि सीयुटः संबंधेन तस्य निरवकाशत्वाल्लक्ष्यसंस्कारवेलोपस्थितत्वबाधः।
सीयुडनुवृत्तविषये चरितार्थ इति भावः। व्याख्यानत इति। निरवकाशत्वरूपस्य बाधबीजस्याभावादिति भावः ग्रंथार्थे ति
।निरवकाशत्वरूपेत्यर्थः। परसप्तमीति। विषयसप्तम्यात्वनंगत्वेन विप्रतिषेधायोग इति भावः। इत्यस्यासंबंधे चेति।त
त्संबंधे हि सीयुधात्मनेपदस्य विशेषविहितत्वाच्चिण्वत्वस्यापवादत्वेनायुक्तो विप्रतिषेध इति भावः। स्यानंतस्येति। एत
त्सुध्युपास्य इत्यत्रोपपादितं। अष्टत्रिंशत्सरव्या सर्वथा दुरुपपादैवेत्याह। अष्टत्रिंशदिति। घ्राद्रिरिति घ्राद्राव

धा॰र

७१

नूद्दिरित्यर्थः। केयङन्तंयेइति। अत्राहु शिवीजं तु ङुकालो चूकमेर्णिङ इतिसूत्रेभाष्यप्रामाण्येन यङाद्दावस्य पाठोऽसांप्रदायिक
इत्यत्र निरूपितं। यङोऽचि लोपस्येति। यङ्लुक्विदीर्घो भवत्येव। नहि यङ्यङ्लुकोरर्थे स्वरे वा विशेष इति भाष्ययोर्न विरोधइ
ति भावः। संज्ञापूर्वकेति। घञर्थे के साधुरित्यन्ये। इति भावकर्मप्रक्रिया। फलांशेति। व्यापारसमानाधिकरणफलांशेत्य
र्थः। किंतु कर्तृत्वमेवेति। कर्तृत्वाप्राप्तेः परत्वाच्चेति भावः। कर्मस्यात्क्रियेति। क्रियायाः कर्मणा साधने न तुल्यत्वा संभवा
दिति भावः। लकारेणेति। लस्यानिकादेशेनेत्यर्थः। लट्स्याश्रवणाद्दाह। न व्यंजनयेति। पक्षांतरेण। यगः प्रतिषेधो वा
च्य इति वार्तिकादिपक्षेणेत्यर्थः। ननु पस्याप्यत्वं। नत्स्यानिकादेशोपस्याप्यत्वं। कर्तेति पदलाभोपायमाह। कर्तरीति
।कर्तरीति। कर्तृस्यनेत्यर्थ इति। यथादर्शनारोहणाभ्यां विषये त्यभूते च विशेषानुपलंभात्कनेति भावः। अन्येषां मतइत्यर्थ

७१

376

मभिप्रेत्याह। उद्देश्यतापीति यत्र धात्वौ यन्निष्ठोंऽश उद्देश्यः स तत्स्य क्रियय इत्यर्थः। उपरिगमनेनेति। आङ्पूर्वस्य रुहेर्गत्यर्थत्वा
दिति भावः। दिङ्मात्रमिति। अजां ग्रामं नयतीत्येवोदाहरणमित्यभिमानः। यत्तत इति वदिति। न च यत्र कर्मोकांक्षा स सकर्म
क इत्युक्तं। शब्दस्वभावकल्पनापेक्षयार्थकल्पनस्य युक्तत्वान्। किंच गच्छतीत्यादौ नामकर्मकत्वापत्तिः। न च हि क्के सेवाकांक्षा
ननु कमिति अनुभवसिद्धमिति दिक्। यद्यपीहेति। न च संयोगः कर्मत्वोपयोगी इत्यंशः कर्तृत्वोपयोगीति बोध्यं। कर्तृत्वमे
वस्यादिति। परत्वादित्यादिः। मेरेस्त्वन्यनिष्ठाभ्रमस्त्वन्यकर्मत्वमुपपन्नमिति भावः। एवं स्थिते। संयोगस्य कर्मत्वोपयोगित्वे निरनु
कूलव्यापारस्य च कर्तृत्वोपयोगित्वे स्थिते। तदीयकर्तुः। कर्मस्य क्रियाश्रयाः कर्तुः। इह कर्तृ सक्रियाकर्तरि। अवस्थाविशेषेति।
पच्यमानत्वावस्थानत्यागवस्थादिरूपेत्यर्थः। नमाभ्रोत्स्येवेति। स्पर्शानेर्गमिवन्। कर्तृस्य क्रियत्वात् प्राप्तिरित्यपि बोध्यं। एवं स

जसीति। उकारीत्वाद्दोषाभावादिति भावः।। किंचाचोत्सनिरूपफलाश्रयत्वयोर्युगपदेकत्र विरुद्धत्वयोपाधिभेदेन भेदस्याव
श्यवाच्यतया मुख्ये कर्तर्येवात्र प्रत्ययो न तु कर्मकर्तरीत्यपि बोध्यं।। नयत इति। अत्राजानिष्टं शास्योद्देश्यतात्कर्मस्य क्रि
योग्यमिति भावः। स्वजन्यात्मानमिति। स्थूलोपाधिविशिष्टस्य कर्मत्वं सूक्ष्मोपाधिकस्य कर्तृत्वमत्रेत्यर्थः।। कृत्स्नः।। विक्लेदनानः
।उक्तविवक्षया।। औपाधिकभेदनिबंधनत्वात्।। येन चिण्वदिट् इति। दुहस्नुनमां न ऊनाविल्ये व सिद्धे युक्तिरणाविल्यस्यैवेयर्थ्या
पनेश्चेत्यपि बोध्यं।। ध्वनितं चेदमार्धधातुके इति सूत्रेष्टभाष्ये।। न चत्यकेयरस्य तु प्रमादः।। तस्मिन्कर्तव्ये इति।। निषेधे कर्तव्येर
त्यर्थः।। कर्तृचिण्ग्रहणयोरिति।। मिलितयोरित्यर्थः चिण्ग्रहणसामर्थ्यं तु सूपपादमेवेति बोध्यं।। न चैव वर्णितत्वादिति।। चि
णनिषेधस्य चिणः कार्यत्वेनातिदेशो विधिचिण्वदिति भावः।। कथमिति चिंत्यमिति बोध्यमिति कश्चित्।। नेतीति।। नयगिनीत्यनुवर्त

तइत्यर्थः। तस्मिन्नेव विषये इति। नेन ककतीह कुत्स्नानापाः दाइत्यत्र नाडीलिके वा नशिश्यनेवलवा अस्यैव कर्तुः कर्मवद्भा
वेन यको विषयत्वाभावादिति भावः। कैयट इति। णेरणाविति सूत्रस्थेत्यादिः। इति कर्म कर्तृभक्रिया। वाक्यार्थ इति। गोकु
लेवत्स्याम इति वाक्यार्थो वा सक्रियेत्यर्थः। क्रियायां विशेषणमिति। संबोधनविभक्त्यंतत्वादिति भावः। परिचाय्यमिति।
ज्ञाप्यमित्यर्थः। चायृधातो रूपमिदं। कलिंगानामेति। बहुवचनांतपाठः। वर्णयंतीति। हरदत्तादय इति शेषः। नकथमि
ति। नच वासरूपन्यायेन सोपि। सारूप्यात्। अनुबंधकृतवैरूप्यस्याग्रहणात्। आदेशकृतासारूप्यमादाय वासरूपा
महर्त्तेश्चा। अतएव हशश्वतोर्लङ्चेति लिङ्समावेशार्थश्चकारः सार्थक इति भावः। भविष्यत्सामान्ये इति। इदं भविष्यति ग
म्यादय इति सूत्रे भाष्ये स्पष्टं। बाहुलकात्स्वः पद्दयोगे त्युडिति कृत्यल्युट इति सूत्रे भाष्ये स्पष्टं। उत्तरमपि योगत्रयमिति।

१४

ग्रा॰२

८१

अपिनालिङ्ःचोर्ध्वमौहूर्तिकइतिचतुर्थस्यापिग्रहणं। नचनद्विषयेनघतनत्वासंभावः। आगामिन्याराज्ञेः पूर्वार्धस्यच
रममुहूर्तादुपरितनकालस्यनत्वसंभवात्। अतएवतत्सूत्रोदाहरणेआगन्तावेतिवक्ष्यतिइतिबोध्यं। पूर्वेणेति। लिङ्स्य
मानसिद्धौलिप्स्यायाअपिसंभवादितिभावः। आर्थिकमुत्तरमिति। एतेनकरद्देतिप्रश्नेइदानीमित्युचितं। किंचगमनस्य
भूतत्वाद्दयमेवइत्यप्युक्तमित्यप्युक्तमित्यपास्तं। मस्याख्यानमाकरेइति। भूतत्वमकारकबोधेत्वनभिधानमितितदा
शपः। वचनमिदमिदमिति। लिङ्थ्यैस्यष्टं। सूत्रमास्त्विति निष्प्रविधायकमित्यर्थः। वाधनमत्रनिवृत्तिः। प्रथमेति। अवर्ते
स्मादिः देवत्रातइति। इदंज्ञाछोरितिसूत्रेभाष्येस्पष्टं। सत्वंमास्त्विति। अकश्चितीति अत्रैवकार्यं। यद्यपीइष्टमआर्थककश्चि
घोगेइच्छार्थोपपदासंभवएवेतिनतस्योपयोगः। कश्चिज्जीवनीत्युक्तेजीवनंमधुरिष्टमितिमनीयनेनतस्येच्छार्थत्वमितिभा

८१

380

वः।इत्यवोच्यतामिति।येनलिङ्नविष्यतीतिभावः।अनुकर्षप्रसंगादिति।तस्याभावेत्युस्यसूत्रस्यप्रत्यासत्त्यायत्रशब्दे
नकामप्रवेदनावगतिस्तत्रैवप्रवृत्तिःस्यादितिभावः।बाधनइति।परत्वादितिभावः।तुमुन्तुभावे॰कामप्रवेदनेचरितार्थइ
तिबोध्यं।बाधेतेति।अतःपुनर्लिङ्विधानं।अत्रापिसूत्रेसमानेत्याद्यनुवर्त्ततेइतिबोध्यं।तदभावादिति।परत्वविषयेवास
रूपन्यायाभावाच्चलोट्प्राप्तेत्येतदपिबोध्यं।तुमुन्परमनुवर्त्ततुमन्।विषयेस्यलिङोविधानादयंभावएव।तेनेछन्कु
र्वेतीत्यत्रायंलिङ्दुर्वारइत्यपास्तं।ध्वनितंचेदमिच्छार्थेष्वितिसूत्रेभाष्ये।उपक्षीणत्वादिति।एवंचशब्दानुपस्थित्यानयोर्वा
क्यार्थमर्यादयासंबंधबोधानुपपत्तिरितिभावः।नशाहा।पदार्थसंसर्गइति।ननुशब्दयोःसंसर्गोवाक्यार्थइतिभावः।शब्दोभा
सनइति।शब्दस्यस्वविशेषणकोपस्थितिःकार्यमितिभावः।ननुशाब्दान्तरमिति।एवंचनयोर्वाक्यार्थविधयासंबंधोदुरुपपा

ग्रा॰ ९

९०

दः उत्तरवर्तित्वादिचानियतमितिभावः संबंधोस्तीति। अर्थ दूरकः संबंधो न संभवतीत्यर्थः। विद्यमाने एव देवदत्तेन कृतौ।
नामतीतत्वस्यानागतत्वस्य वा प्रतीतयेऽयं प्रयोगः गोधर्मस्य संबंधिन्यारोपाद्दासीद्भवितेत्यतीतानागतव्यपदेशस्तत्सत्वं
चनन्निष्ठदरिद्रत्वप्रकाशनं। नच तदस्यास्तीत्यत्र संख्यावद्वर्त्तमानकालोऽविवक्षित इति वाच्यं। भाष्यादिविरोधापत्तेः दृढ
नमानयेत्सुकेऽतीतदंडस्याप्यानयनापत्तेश्च। तस्मात्सप्रयोगएव तत्सूत्रप्रवृत्तिं विना दुर्लभ इति भावः स्पष्टं चेदं भाष्ये। अ
तीतानामपीति। अतीतनदर्थप्रतिपादकानां धातूनामित्यर्थः। अयमपि दोषः। उक्तव्यवस्थाया असिद्धरूपः। किंसूत्रे
णेति। स्पष्टं चेदं सूत्रप्रत्याख्यानभाष्ये। अत्र पक्षे वसनादर्शत्सादोदर्शनकालिकं वा तस्य वर्त्तमानत्वं बुद्धिस्थीकृत्यप्र
त्ययः तत्फलं च दर्शनेन तत्समानकालत्वप्रत्ययः शतस्य लक्रिययोः समानकालिकत्वप्रतीतेरेवमेवानुचोत्सन्नेवव

९०

चनलोपंचोदितास्मइतिसरूपसूत्रस्थभाष्यप्रयोगोपपत्तिरितिबोध्यं।नपौर्न्यर्थोहिस्वविधिरिति।क्रियासमभिहारेद्वि
त्वमात्रंविधीयतामितिभावः।स्यायनएवेति।धातुसंबंधाधिकाराच्चेत्यपिबोध्यं।यथाविध्यर्थंवचमिति।यथाविध्येवेतिति
यमार्थंवचनमित्यर्थः।पूर्वस्मिन्नेवेति।नियमस्तुनअन्यत्रनस्याप्राप्त्यानियमवैयर्थ्यापत्तेः।नद्भमसादिति।द्वित्वमकरणं
भाष्येपाठात्तत्कृतसूत्रेपिक्रियासमभिहारेलोण्मध्यमपुरुषैकवचनस्यहिभवतइतिवक्तव्यमितिपाठाच्च।अतएवेदं
द्वित्वंलोडंतविषयमेवेतिभावः।अनुवादित्वेति।पश्चात्कथनमात्रेत्यर्थः।नतुव्यवहितगर्भइतिभावः।सूत्रप्रत्याख्यानेति
।यथाविधीतिसूत्रप्रत्याख्यानेत्यर्थः।पूर्वत्रापीति।सक्तून्पिबेत्याद्युदाहरणेपीत्यर्थः।द्वित्वादिति।द्वित्वंक्रियासमभि
हारइत्यनेन।आदिनापुनःपुनःशब्दप्रयोगइतिबोध्यं। ।इतिलकारार्थप्रक्रिया। ॥इतिदीक्षितनभट्टोजिपौत्र^

॥ ॥ राम ॥

ग्र·र दीक्षितहरिविरचितेलघुशब्दरत्नेनिर्ऊंनं समाप्तं॥ ॥श्रीसरस्वत्यैनमः॥ राम ॥

॥ राम राम

॥ ॥छ॥ ॥

८१

८१

(नं. ४४)

॥ अथश्री शब्दरत्नाख्यो ग्रंथः॥

॥श्रीगणेशायनमः॥ ॥इत्यनुवर्तनतइति।शबादीनांसार्वधातुकत्वाद्यर्थमितिभावः।तेनलैःसार्वधातुकानुदात्तत्वसिद्धिः
।इतिदिगिति।शपिधातोरितिसूत्रात्तदनुवृत्त्यासिद्धेस्पष्टार्थमेवायमितिदिगर्थः।कृत्वाइत्यधिकारस्येति।अतएवतएवुल्
नचोरत्यन्ताद्दिषुपाठेनाकारि।स्पष्टंचेदंभाष्ये।बाधेसतीति।येननाप्राप्तिन्यायेनेतिभावः।भाष्येएवंतात्पर्येयःकृद्दित्संज्ञा
प्यइत्यवायेइत्यस्यसंबंधमाश्रित्ययकाव्यवधानेसमाहितं।नत्वादित्वमिति।नहत्त्वनित्यर्थः।गुरुभूतक्लेशसाध्यनियमार्थत्वे
चलस्यानुसारिभाष्यमेवमानं।कृतमात्रेति।अतएवकार्यातरारणिभाकृतानिएयंतेनभवंति।भूतपूर्वाद्दर्पीति।आर्धधातुकेवि
वक्षितेऽकारलोपइतिभावः।स्पष्टंचेदंभाष्ये।इतिभावइति।यद्यपिप्रत्ययःपरश्चेतिशास्त्रादार्धधातुकस्यपरत्वेनैवविवक्षेति
परवृद्धिनिमित्तत्वेनपरनिमित्तत्वमस्त्येव।स्पष्टंचेदंद्विर्गोर्लुगनपत्यइत्यत्राकरे।तथापिआर्द्धधातुकेत्यादेःपरसप्तमीत्वेन्

ग्रा·र· इदंमूलमितिनत्वं। इतिज्ञानेनाणोलोपेइतिप्रकृत्यतत्रयत्नेनाणेर्नविशेषः। यद्वंतस्यअनुकृत्वाभावात्। इष्टानिष्टधात्वोरिति। अ

१ अ·गा·२ नेनहिणोपास्तेशोविधीयते। अनुबंधानेकांतत्वेतुनेदंसिध्यति। एणशादीनांवाक्यार्थबोधेनतंप्रत्ययत्वज्ञानेसर्वेत्संज्ञाप्रवृत्तो

अ·स्व·३ पदेशोत्तरकालमेवप्रवृत्तेरुपदेशे तत्सन्निधानकृतासारूप्यंदुर्निवारत्वात्। पूर्वैर्णोति। पोरदुपधादित्यनेन। नदिंतइति। नचसा

धुरितिप्राप्तिनीयइत्यर्थः। षष्ठ्यादुर्वारत्वादिति। अवंतत्वादितिभावः। नचात्रतद्धिताधिकारात्कथंतस्मादितिः कृदंतशक्त्योपस्थि

अ कां·५ तार्थनिरूपितकर्तृत्वसत्वेनात्रप्राप्तिः कृतपूर्वीत्यत्रतुनैवं। नहृदुकेनतस्यस्वार्थेतेनष्णकाभिप्रयोगाभावेनसक्रियाइणायामपि

कृदंतशक्त्योपस्थितार्थकर्मत्वाभावात्। तद्धिताधिकेष्वित्यस्याधितद्धितांतशक्तिमात्रसहकारेणोपस्थितक्रियाकर्तृकर्मणो

२ अर्थः·६ र्नेइतिभावः। करणत्वविवक्षयेति। कर्तुःकरणत्वविवक्षयेत्यर्थः। मतमाश्रित्येत्यनेनतन्मतस्यपूर्वोक्तस्वरीत्याऽयुक्तत्वंसूचितं

387

त्तिनास्य परिहारस्यायुक्तत्वं सूचितं इति दिगिति। अत्र पक्षे कृत्यानामिति सूत्रे विभक्तेन कर्तरि वेत्यनेनानुभयप्राप्तिविषयेण॰
विकल्पान्नतीये निबोध्यम्। नमभवनीति। संज्ञापूर्वकत्वस्यासत्वेपि प्रथमोपस्थितमस्त्यपवाधापेक्षया पश्चात्प्राप्तवृद्धिबाध
एव भाष्यप्रयोगात् आप्य इति बोध्यं। नियमो नास्तीति। हाने तु नियम एवेति भावः। संभक्तिर्वरणं याच्ञारूपं। वृञ्वरणे इत्यत्र
वरणं स्वीकारस्तत्र निरोधरूप एवेति भावः। सर्वं निरुक्तमिति। भाष्ये कस्मिंश्चिद्धौ हृओ ग्रहणं कर्तव्यं। इह मा भूत्। वार्या ऋत्विज इ
तिकर्मणि निरुपपदो ग्रहणादिति भावः। ईड इति। अनएव वृद्धिर्न। अत्र च प्रसिद्धित्वादिरणस्य च ग्रहणेनेनाध्येयमिति॰
सिद्धम्। आत्मनेपदिन इति। आत्मनेपदघकारवृद्धिकरणमकृतिभूते ईडवंदृशसाहचर्येणानात्मनेपदिन एव क्याद्वै
ऊहन्नाद्वेन ग्रहणं। एतेन पूर्वोत्तरसाहचर्यादीड इति सूत्रे उभयपदिनो ग्रहणमित्यपास्तम्। पूर्वोत्तरयोरेकैकस्योभयपदित्वाभा

२

ग्र·र·
२

वाच्चेतिभावः।विषयसप्तमीति।इदंचाचः कर्त्तर्यकीतिसूत्रेभाष्येस्पष्टं।परसप्तम्याश्रयणादिति।वस्तुतोविषयसप्तमीत्वेपिये
विभाषेत्यत्रजनादिसाहचर्येण पादिप्रसप्तयोत्पत्तिकालेनांतनत्वेनैरेवनेनात्वविधानेनात्रनदृप्राप्तिरितिबोध्यम्।यस्त्वत्रयोने
ति।वरः सुपीतिचकारस्मामइत्यर्थः।नद्विनेनापीति।यतेनतिद्वेषः।इतिदिगिति।उपपदसमासतत्प्रयुक्तत्वणादिसिद्धिर्दिग
स्तः।ममत्वमेतिलुप्तसप्तमीनिर्देशात्तरसिद्धमितिबोध्यम्।किंचामावस्येतिसहस्तंपतोनावइत्याघुटान्तस्यादंतस्वरितंलिष्य
नेइतिबोध्यम्।लिंगाच्चेति।एवंदंतद्रधानोस्तनत्वस्वरविधानेलिंगमितिभावः।भाष्यादीतिनत्रोभयविषयवार्त्तिकस्यैवपाठा
दितिभावः।उपपदसमासासंभवेपीति।उपपदत्वाभावादितिभावः ततएवकृदुत्तरपदप्रकृतिस्वरोपिबोध्यः सानुबंधकत्वादि
ति।नचानयालुग्विकरणपरिभाषयाचोभयोर्ग्रहणापत्तिरितिबोध्यम्।उदिश्रयतियोनीस्वादेशप्रसिद्धत्वेनयोनेरेवग्रहणमि

२

स्याद्यापात्। योनिरिति। उत्पत्तिस्थानमित्यर्थः। सायस्मिन्निति। असंमतिरिति बहुव्रीहिरिति भावः समिध्यमानवतीसमिद्धवत्यौ
ऋग्विशेषौ। प्रक्षिप्यमाणेति। प्रक्षिप्यमाणसमित्करणीभूतेत्यर्थः। निर्मितं स्थलमिति। अग्निस्थापनादिति भावः अन्ये त्वर्थे वि
ति। लिङ्ग्चेति विशेषविधानेन लोपबाधे सिद्धे अत्र तु मनुग्रहणं चिंत्यप्रयोजनमित्याहुः। अनित्यताज्ञापयितुं शक्येति। तन्न
ज्ञापने च शक्ति लिङ्गविषये नष्टभावशंकावारणाय च सार्थक इति भावः। भैषाद्यर्हादिसूत्रविषये तु अप्रवृत्तेः काचित्कत्वाद्य
सरूपप्रवृत्तिरिति तात्पर्यम्। कृत्यल्युजग्रहणेन चेति। ण्वुलः प्राक्कृत्या इत्यधिकार इत्यर्थस्तु व्याख्यानेनापि सुलभ इति भा
वः। इति कृत्यप्रक्रिया। भाष्यकृतोक्तमिति। एवं च तत्र ण्वुल्ल्युटोरनभिधानं बोध्यम्। इहहीति। शीआनुश्या अदिति वा
नष्टेद इति भावः वार्त्तिकमिति। नलोपविधायकमित्यर्थः। एवं च तत्र ण्वुल्ल्युटोरनभिधानं बोध्यम्। शिल्पिनीति। नद्विष

शा. २.

३

यकमन्नास्तच्छिल्पवनिगानकर्त्तरीत्यर्थः। आप्तिर्वेध्येति। सोपसर्गे तु पूर्वेणैव सिद्धं। न च तत्रापि सुपीति योगविभागात्कप्राप्तिः।
आतो नुपेति सूत्रारंभसामर्थ्यान्न तत्कर्मण्युपपदे प्रवृत्तेरिति भावः। अप्युगिति। सुपीति कोनोक्तयुक्तेः। यद्वा सत्सु इति सूत्रे उपस
र्गेपीत्यनेनात्र प्रकरणे सुप्युपपदे नोपसर्गग्रहणान्नेति भावः। पूर्वेणैवेति सुपीत्यनेनेत्यर्थः। अत एवास्य नित्यैकवचनांतत्वं
न तु धाकादिवत् द्विवचनाद्यपीति भावः। नित्यसमासार्थमिति। नित्याधिकारस्योपपदसमासार्थमित्यर्थः। अकर्त्तरि केइति।
अत एव प्रतिष्ठंतेऽस्मिन्धान्यानीति प्रस्थइति भाष्ये व्याख्यानं। चित्स्यइति। इत्संज्ञकचकारवत्स्यइत्यर्थः। परिभाषालभ्येति अ
नासत्तिकत्वेन सकर्मकत्वेन चास्यैव ग्रहणं बोध्यम्। हरद्ताद्विभिरिति। अनेन भाष्यकृता नप्रत्याख्यानमिति ध्वनितं। तेन हे
त्वाद्विग्रहणस्य सूत्र एव निवृत्याचैषुकृत्रः प्रत्ययद्वयमपीत्याशयेनाचार्येणोक्तमिति सूचितं। अत एव। अचारस्य बाधादेवेति

स्य। इति कृतः। अस्मिन्पक्षे। पचादिपाठपक्षे। एवं च पक्षभेदे फले क्वाप्यन्यासकृता पूर्वविप्रतिषेधमाश्रित इति कश्चित्। भाष्यावेसु
क्तमिति वीजं। तरमपि पूर्वसूचितमिति बोध्यम्। तदंतविधेः सिद्धा विति। उत्तरपदाक्षिप्तपूर्वपदस्याप्यविशेषणादिति भावः। मुमू
प्रवृत्त्यर्थमिति। अन्यथा परत्वान्नुमुप्यनजंतत्वान्नस्यादूत्स्व इति भावः। समीपपर इति। समीपमात्रपरो व्याख्यानादित्यर्थः। समीपः
समीपस्थाः स्तविहितः स च खितोतिहत्स्वविधायकविहितो नुपस्थितत्वादित्याशयेनाह समीपः। खित्यनव्ययेत्यादिके यद्दस्य
थमिति। अत्रारुचिवीजं उदित्सति कूले उपपदे रुजिवहोरंतनरः प्रत्ययइत्यर्थेन स्थितिः। नेमाग्न्धानोरिति नियमात्त्वानिप्रसंगः। उप
पदसंज्ञालिंगं तु प्रथमार्थे सोत्रीस मम्येवा न तु सर्वापीत्यन्यत्र प्रपंचितं। उत्तरार्थत्वमेवोपपादयति दिर्घंतपद इति। सुप्यजातादिति
सिद्धे इति। उक्तमिन्नीत्यत्र बहुव्रीहेश्वांतोदात्तत्वानुजानिपूर्वादिति ङीषद्रत्यत्रापि अजातादिति निषेधो दुर्वार इत्यरुचेराह। गि

रसः शीर्षेति। प्रविश्यतेति। षष्ठीनमेनन्। पाठान्तरे। कपाटेति पाठे। हरदत्त इति। बाहुलकात्कोरार्टजित्यन्ये। गति समासेति। अंत
स्य गतित्वादिति भावः। अगत्येति। एवं च अंतोस्युदे विषयः। केवलः स्युन इति भावः। स्पष्टीकरिष्यन्त इति। एवं च नञ्त्व्यर्थमेवेति
भावः। नन्वत्रैव कर्तृत्व प्रचर्यार्थे नत्वकर्मण्युपपदे एको न्यत्रापर इति। न च भुवोऽकर्मकत्वात्कर्मणीत्यस्यासंबंधे उक्तार्थे फलाभा
वोर्थान्तरे सकर्मकत्वेप्याद्यारीनां अयर्थत्वासंभव इति वाच्यम्। अंतर्भावितण्यर्थस्य करोतिपर्यायत्वेन तद्योगे कर्मत्वस्य अ
र्थयोगस्य चेसंभवात्। एवं च तत्रैव प्रवृत्तिः स्यात् कर्मणीत्यस्य निवृत्तौ मानाभावात् कर्तृग्रहणाच्च सर्वत्र प्रवृत्तिरिति चेन्न। अंत
र्भावितण्यर्थस्य भुवोऽप्रसिद्धत्वेनात्र ग्रहणाभावात्। ध्वनितं चेदं भुवो भाव इत्यत्र भाष्ये। रमिजपोरप्यंतर्भावितण्यर्थत्वसंभवेन
तन्वेरम इत्यस्यासिध्यापनेश्च। नहि तत्रापि कर्तृग्रहणमस्तीति दिक्। डुआगमेनेति न चेकाराभावे रत्वस्य चरित्वं स्यात्। व्याख्याने

ननिर्णयसंभवेनास्तत्वेति भावः। तत्सामर्थ्यादिति। तत्सामर्थ्याच्च प्रतिपदोक्तपरिभाषायास्तदनुबंधकपरिभाषाया असिद्ध
त्वपरिभाषयाश्च बाध इति भावः। चिंत्यमेतदिति। स्पष्टं चेदं भाष्ये। कर्त्तृप्रत्यय इति। तत्सामर्थ्यादस्यानित्वमिति भावः। तदाह सुचं
न इति॥ कथमपि सिद्धेरिति। न च युक्तं नेत्यत्र विशेषः नकारप्रत्याख्यानपरभाष्यप्रामाण्येन स्वरूपोर्थयुक्तं गभावस्याधृनित
त्वात्। इतिदिगिति। अत एव सत्सूद्विषेति सूत्रे सदादिसुपूर्वग्रहणं कर्त्तव्यमिति भाष्यं संगच्छते। कर्मकर्त्तरीति भाष्ये तत्त्वध्यारोपि
तमेषणपक्षेप्यस्यानिर्दिष्टा॥ निर्दिष्टेति। असंज्ञात्वात्सूर्वपदादिस्यस्याप्राप्तिरिति भावः। नीरूपप्रत्ययेति। नीरूपोयः प्रत्ययः
क्विप्तद्विषयमित्यर्थः। वासरूपसूत्रे भाष्येप्यातमनाय इति दंत्यपाठ इति भावस्तदाह। नेनेति। संप्रति तु भाष्ये मूर्धन्यपाठो दृश्य
ते तस्याप्रामाणिकत्वेनीरूपाद्धातोर्विहितप्रत्ययविषयमित्यर्थः। तेनेत्यस्याय पर्येत्यादिदंडकपठितनयतेर्धातोरिति शेषः। अत्र

शा·र·

निर्णयो बहुश्रुतेः कार्यः पूर्वसूत्रे। जनसनखनक्रमेति सूत्रे। आकरः। हत्यादिः। अज्ञसाहचर्यमिति अज्ञसंबंध इत्यर्थः। तेन
यस्मात् स्मासेरङ् न तत्रैवेत्वमिति भावः। हशोय इति। परस्मैपदे दृशेभ्यः सर्त्यादिभ्यः परस्य च्लेरङित्यर्थ इत्यभिमानः वस्तुतः
परस्मैपदेष्वाङित्यन्यत्र निरूपितं। पावानः इत्यस्य वनिपा सिद्धिमाश्रित्येवमवकारादावित्यस्य भाष्ये प्रत्याख्यानादा
ह। भाष्यकारीयेति। इति पक्षे इति। धीर्दधानेध्यीयनेर्वेति ध्यायतेः संप्रसारणमिति वार्तिकस्य भाष्यानुगुमास्ये त्यत्र हलीत्य
स्यानजादावित्यर्थे लक्षणे इत्यपि बोध्यम्। न सक्षेप्रत्ययलक्षणसूत्रस्य नियमार्थत्वेपि स्थानिवद्भावस्य सुलभत्वात्। एतेन
।प्रत्ययलक्षणसूत्रस्यालुविधौ विधौ विध्यर्थत्वेन। निष्कर्षे त्विति। नियमार्थत्वेत्वित्यर्थः। कक्षिपाविति। वासरूपन्यायेनेति
भावः। कृतत्वमिति। शंकरोतिनच्छीला शंकरा परिव्राजिकेत्यत्र परत्वात् प्राप्तमित्यर्थः। बाधेनेति। न च कस्य परत्वाद्बाधेन स

रूपनयाचवासरूपामक्तस्यानित्यवाधेपिक्किमेनन्यायेनसुलभइतिवाच्यम्। धातुग्रहणाद्धि ध्वंतरकल्पनेन नत्सामर्थ्याद्देला
दिषुपरत्वात्प्रामस्य रस्येववासरूपन्यायेनपुक्त्राप्तक्किपोप्यत्रवाधात्। नचपुरस्तादपवादन्यायेनरस्यैवायंवाधकोनक्कि
पइतिवाच्यम्। येननाप्राप्तिन्यायेनरस्यैवायंबाधकोनक्किपइतिवाच्यम्। येननाप्राप्तिन्यायेनक्किपएववाधइत्यपिवक्तुंशक्य
त्वात्। तस्माद्धात्वसामान्यपेक्षयोभयोरपिसवाधकइतिस्थः कचेतिवाधकवाधनार्थं। नचस्थःकचेतिचोऽनर्थः। वासरूपन्या
येनकस्याभावेक्किपः सिद्धेरितिवाच्यम्। अस्यधातुग्रहणाभावेऽपवादत्वेपिक्किवपवादत्वाभावेन धावेन धातुग्रहणवाधि
तक्किपश्चविनासाधयितुमशक्यत्वादितिस्पष्टंभाष्ये भाष्ये। इतिभविष्यतीति। अंतवत्वेन धातुत्वाच्छस्य इत्याद्यावानो धा
तोरितिलोपसिद्धिः। स्थानिवत्वेनुनापूर्वविधित्वादितिभावः। ईत्वाभावार्थंचेति। धातुग्रहणसामर्थ्यात्क्किपोऽप्रासेरितिभावः

ग.र.

मेवमिति। अयं भावः। पूर्वधर्मावच्छिन्नो देशस्य कविधित्वेन हृदनिङ् इति सूत्रस्य भाष्यरीत्या स्थानिवत्वस्य दुर्वारत्वात्। न च
धियाविस्तादावियङ्न्यायरीत्या पूर्वरूपस्य स्थानिवत्वस्यादिति वाच्यम्। आकारात्पूर्ववृत्तिधर्मावच्छिन्नो देशस्य कत्वाभा
वात्। इवर्णेन धानो हि सः। एतेन जुहुवतुरित्याद्यसिद्धिः। अत्र पक्षे इत्यपास्तम्। धियाविस्तत्रैकादेशः स्थाने हल इति दीर्घप्र
वृत्तेश्च भीईभियइति स्थानिवत्सूत्रस्य भाष्यं तु सोत्रत्वादियङ्। लोके त्वीदृशप्रयोगो साधुरेव परनिमित्त इत्यत्र परो स्था
निभूत एव गृह्यत इत्यत्र न मानं नान्यत्वे ङिन्यन्यापस्यापवादे विषयत्वेन दृशविषये ऽहनेरिति दूषणं नरमाह। अ
काविस्तादिगतिकारकेति। स्याधानोरं नर्भावित्स्यर्थत्वेऽशाशब्दार्थस्य कर्मत्वेन कारकत्वमिति भावः। उपसर्गेण र
मिति। पंचम्यं नोपसर्गपदे न भिन्नं वाच्यं न रशब्दस्य समासस्तेनोपसर्गभिन्नमित्यर्थः। णौ नो सत्येवेति। साधुकारि

शब्द इति शेषः। साधुकारिणीति। वस्त्रवादिशब्देणिनिरिति शेषः। णिनिस्त्विति। नत्रैव शब्द इत्यर्थः। यद्यपि णिनिरिति। अ
नेन वार्त्तिककारिताप्यर्थं दर्शितं। नक्षिति। अत एवात्ममान इति सूत्रे यगर्थं कर्मकर्तृग्रहणमिति वार्त्तिकं शक्यं नैव सिद्धिमाह
श्रित्य भाष्ये प्रत्याख्यातं। अन्यथा ननारेरुप्रत्ययवारणाय वार्त्तिकमावश्यकमेव स्यात्। कर्मणि षष्ठ्येणि षष्ठ्येति। कर्तृषष्ठ्या
तु न समासः। आत्मग्रहणसामर्थ्यादिति भावः। इति प्राप्तमिति। पुंवत्कर्मधारयेत्यस्य न प्राप्तिः समानाधिकरणस्यस्यैव क× करणाधि
मधारयत्वात्। अत्राभेदान्वयाभावेपि पूर्वपदार्थस्यैवोत्तरपदेनाभिधानाद्वस्तुतः सामानाधिकरण्यमस्त्येव एकविशेष्य
कप्रतीतिजनकत्वस्यैव सामानाधिकरण्यपदार्थत्वात्। अत एव कुम्भं नेमहद्भूतेत्याशंकितः कर्त्तृत्वेप्यमहच्छब्दार्थस्यैव
महच्छब्देनाभिधानात्सामानाधिकरण्यप्रयुक्तपुंवत्त्वसिद्धिरितिदिक्। प्रत्ययः। प्रत्यय इति सूत्रस्य प्रत्ययपदार्थरूप इत्यर्थः

(३९८)

ग्रा॰र॰
७

स्त्रियांवर्तेनत इति।पुंयोगादितिसूत्रबलात्स्वलिंगत्यागेनस्त्रियांवर्तेनत इत्यर्थः॥नञोहेति।भाष्यप्रामाण्यादितिशेषः॥अस्त्रि
धिसामर्थ्यादिति।समाससंज्ञाप्रातिपदिकसंज्ञोत्तरंमध्येजातस्यनञ्मध्यपतितत्वादग्रहणेनग्रहणेपिनञ्द्वयपर्वत्वाभा
वज्ञापनेनेतिभावः।नचस्वमोरित्यस्याप्यर्थवत्त्वमोग्रहणज्ञापनद्वाराऽप्रवृत्तिःस्यादितिवाच्यम्।येननाप्राप्तामध्येपवा
दृन्यायेनचसामासिकस्याप्रवृत्तिनिमित्तज्ञापनेपिस्वमोरित्यस्याप्रवृत्तिनिमित्तार्थज्ञापनेमानाभावात्।अर्थवत्सूरिभा
षात्वनित्यत्वादत्रनप्रवर्तते।नचांतरंगेलुक्यमसि॰ उत्तरपदाधिकारेंतरंगपरिभाषायाअप्रवृत्तेः॰ अन्यथापरंतुपरस्सा
द्दावनुस्वारोनस्यादितिस्पष्टंभाष्ये।यत्रप्रातिपदिकस्यैवलक्षणामानसिद्धा।तत्रस्वलिंगत्यागोयत्रतुपरस्यलक्षणातत्रस्वलिं
गात्त्यागइतिमर्यादेतिदिक्।करणमिति।यजेस्त्यागकरणकव्यापारेशक्तिस्तत्र्यापाररूपभावनायाभाव्याकांक्षायांधात्वर्थ

स्यकरणत्वेनैवोपस्थितेः स्वतः पुरुषार्थत्वाभावाच्च सुखरूपः स्वर्गो भाव्यत्वेनान्वेति। त्यागस्य करणत्वं च भावनाभाव्यनिर्वर्त
कत्वमेव। सर्वत्र करणानामीदृशमेव करणत्वं संख्यावचनस्यापि ज्योतिष्टोमशब्दस्य तद्वत्त्वारोपेण त्यागसामानाधिकर
ण्यात्करणत्वं स्वर्गादेः कर्मत्वमपि भाव्यत्वरूपमेव। ननु फलाश्रयत्वरूपं। अत एवेदृशानां कामानां न पापदैर्नैवोल्लेख इति दिक्
। तल्लभ्यत इति। एवं कुमारशीर्षयोरिति सूत्रमपि कुत्स्यायामिति भूत इति सूत्रे भाष्ये ध्वनितं। ततः परिशेषादिति। तस्याप्युद्दे
श्यत्वेन लिप्सः पूर्वमेव निवेशादिति भावः इत्यवधारणेति। इति नियम इत्यर्थः। कालनियम इति। आनन्तर्यादिति भावः। नि
ष्ठात्विति। मध्ये पदार्थान्तरस्यापातेन तन्निवृत्तेरभावादिति भावः। प्रकृतिकालेति। तथा च भाष्यं। उभयतो नियमो यत्र स्यादिष्येवेति
क्विबेवेति। दृगिति। दृगर्थस्तु दृशिग्रहणेन निर्वाहस्यागतिकगतित्वात् विधायकत्वमेवैषां भाष्ये तूदासीनमिति। अनेनै

शा॰ र॰

८

वेति। अन्येषपीति सूत्रेण। द्वयोरपीति स्त्रीहिंसायामित्यस्यापि ग्रहणं बोध्यम्। नतिष्ठेति। एकदेशत्वादिति भावः। द्वाविंशतिरिति।
यद्यपि गृध्धत्वेनापि नत्वदर्श्यनेन तथाप्येन तथाप्येकीयमतं तदिति भावः। रदाभ्यामित्यनेन नत्वसिद्धिरित्यन्ये। पुनातेरिति
। पून इत्यर्थः। क्रमस्य ये चेति। भावे घञर्थे कप्रत्यये चेत्यपि बोध्यं रूपस्येति। इदं हनि कारेके ष्यमिमायेण। भाष्य मिति। वित्तो भोगे
निसूत्रे इति शेषः। आदितश्चेतीत्यस्यनेउतिशेषः। अन्यथेति। यद्यपि कर्त्ता सिद्धस्तथापि न ह्नननिमित्तत्वस्य विधेयत्वेन वि
शेषविहितेन कर्तृगननिमित्तत्वेन भावकर्मगतं क्तनिरूपितं निमित्तत्वं बाध्यत इति भावः। विकल्पेमामे इति। धर्षेरादित्वादिति
भावः। वित्तस समुद्यतमिति। अवैयात्ये भावादशवादित्वफलस्य सत्त्वादिति भावः। होढ इति रुदत्वे इति। घत्वाभावमात्रं निपात्यतामि
ति भावः। धातुविशेषणार्थ इति। इयन्निर्देशद्वारा धातुविशेषलाभार्थ इति भावः। अभ्युपेत्येति। इन्तिपं विनापि सेवेत्याहेश

पानिर्देशावतद्रूपनानिर्देशस्य कर्तुमशक्यत्वेन शब्दान्निर्देशादिउभावमभ्युपेत्येत्यर्थः। साभ्यासस्येति। एतच्च माधवरीत्येति।
वोध्यं। नयाचाहुश्चारिति। भाष्यकृत इति शेषः। आवर्तनेन उत्तिएने नादेः परस्येत्यादेः सस्यादित्यपालं। विवक्षितेति। प्रा
मापन्ने चेति सूत्रप्रयोगादिति भावः। भाजनं। भोजनपात्रं। इष्ट्वलिति। नचानेन सिद्धे तत्र लिङ्ग्रहणं व्यर्थं लुङ्लङ्भ्यां वा
धापनेः। अनुबन्धानिरिक्तक्तोपदेशिकासरूपत्वस्यैव वासरूपसूत्रे ग्रहणेन तस्येहाप्रवृत्तेः। अत एव लिडा लुङ् बोध्यते
इतिदिक्सिद्धानि नत्वादिनि। आरिवानित्यादौ गुणास्तु ऋच्छत्यृतामिति त्र ऋकारप्रश्लेषेण ऋधातोः पुनर्विधानाद्बोध्यः
।हरद्रनेत्यादि। अत्रारुचिबीजं तु विभाषापूर्वाह्लेति सूत्रे भाष्ये पपुष आगतं पविवद्भ्यमिति लौकिकविग्रहे ङसुमयो
गाह्लोकेपि ङसुरुक भाष्यप्रमाण्यात्संयोगान्तेभ्यश्छे ह्रस्वेव ङसुः कान चतुष्टं ह्रस्वेव उन रसूत्रेभ्योऽन्यत्र क्वचिदेवेत्यर्थ

गो.२

ज्ञापनार्थमिति। गतानुगतिकनयेति। गतानुगतिकनयेति। गतमनुलक्ष्यीकृत्य गतिर्यस्य न त्वेनेत्यर्थः। द्वित्वाभावादीति। आदिने
ईभावदीर्घत्वानि। अयं वृत्तिग्रंथोपि कसोर्लोके प्रत्नो साधक इति बोध्यं द्विरिमिति। द्विर्गर्थस्तु पदविभागस्यापि लौकिकत्वात्तत्र दीर्घ
स्योचित्स्येपि नदभावाय एषोदराद्वित्वस्यावश्यकत्वेन तेनैव सर्वसिद्धाविदं व्यर्थमिति। वस्तुतो न लक्षणेन पदकारेण अनुच
र्णोइति न्यायेन तथा पदपाठेभ्यांस्येवेति बोध्यम्। नेडूशीति। इदमेकाचउपदेशे इत्वस्याप्युपलक्षणं। इति पक्षे इति। अत्रारु
चिवीजं तुई यतुरित्यादौ यणादेशोससावकाशः। अचःपरस्मिन्निति पूर्वस्यैव विधौ न पूर्वपरविधौ एवं च सवर्णे दीर्घकृ
तेकादिनियमादित्यिकृतदीर्घस्येयादेशो निपातनादिति बोध्यं। नेनेति। अहृतमूहपरिभाषयेति भावः वस्तुतस्तु नइघपि नक्षनि
रितिनिरूपितं। व्याख्यानमेवेति। अत एवैकादिष्वस्य ई यूभवतीति भाष्ये दीर्घोच्चारणमसंधिश्चेति बोध्यम्। सामानाधिक

रण्यमिति। अप्रथमांतेनेत्यादि। आदेशयोरिति तिङ्रूपादेशोपस्थापकत्वं कर्मणोऽप्रथमांतसामानाधिकरण्याभावा
दाह। शानच्शानचोरिति। तस्यानिलकारे प्रकृत्यर्थप्रतिप्रतिप्रधानभूतकर्त्राद्यभिधायकत्वमेव कल्प्यते। एवं च कल्पितसामाना
धिकरण्यानुवादेन शानजादिविधिरिति भावः। इति सिद्धांतादिति। वस्तुतो विग्रहे इत्यनुसार्येव विशेष्यविशेषणभावः क्रियाप्र
धानमिति तु लोकेऽर्थबोधाय प्रयुज्यमानाख्यानविषयमेवेति निरूपितं। यावद्ध्यादेवेति। स्वरोद्देश्यकविधेरभावात्। हल्
स्वरस्वरभावेऽभावाच्च न व्यंजनस्याविद्यमानवत्वं। एवं हि पुनरिति। इह वृत्त्यनुसारिभाष्ये तु नह्यभावे प्रत्ययांतत्वमेवस्यादेवं
च कर्मणि शानज्नस्यात्। अतो लटः शानच्शानचावित्येतद्योगविभागेनायमर्थः साध्य इत्युक्तम्। अनुबंधग्रहणेति। एकानुबंध
केत्यस्याप्युपलक्षणं। न लिति। लट इति निर्देशेनेति भावः। वासरूपन्यायेनेति न च भिन्नार्थत्वात् तयोर्न तिङपवादत्वं ति॥

श·र·
१०

ङिहिसंख्यायुष्मदाद्यर्थोपिभासतेनेत्युक्तीतिवाच्यम्। युष्मदाद्यर्थस्यसमभिव्याहृतपदेनसंख्यायास्तदुत्तरसुपाप्रतीत्याऽ
विशेषादितिभावः। लादेशेष्विति। प्रत्ययविषयत्वात्तस्यादेशेऽप्रवृत्तेरितिभावः। अनुबंधग्रहणपरिभाषेति। एकानुबंध
कपरिभाषेत्यर्थः। स्थानेऽन्यमिति। लरुत्वस्यनिवृत्तेरितिभावः। युक्तेनसंयुज्यमाने इति। कर्तरिशप्त्रनस्येतिशेषः। अप्र
धाने। ऋत्विक्षु। अधिकारीति। पूज्यमानेत्यर्थः। श्लोकेवेति। पृथक्पाठेनेत्यर्थः। मत्सयमाहुरिति। अत्रारुचिबीजंतुदान
पाठस्यबहुसंमतत्वाभावः साहचर्याच्चेति। धिनुणाकर्मकाणामितिभाष्येकैः। सकर्मकात्त्वत्यपिबोध्यम्। ईतिविशेषण्
ति। नचतत्रशीलादिषुनत्वाधकः वासरूपन्यायेनसिद्धेरितिभावः। एवंनस्मरेति। पूर्वसूत्रस्यभरसर्योन्तसाहचर्या
न्नतुदेवः। नसिध्येदिति। नचतत्रनितिसुरित्यादिवत्सरत्वादुग्रत्स्ययः प्राप्नोतीतिवाच्यम्। एधादिभ्योयुजभावस्य

१०

फलसत्वेनासन्नेः मूलं तु हत्स्वनुरोधेन चेनानुक्तसमुच्चयार्थेन जुगुप्सनार्हो युजित्यर्थे। यथाश्रुतभाष्यमिति। भवतिरेणयुवः

समावेशः इति भाष्ये ठक्‌म्। त्रयाणामेवेति। त्रयाणामपीत्यर्थः। आरम्भानाद्दिति। कृ-ि मकारासाच्छीलिकाइत्याद्येनिसूत्रे

भाष्योक्तेरिति भावः। मस्वयायस्वयपयोरिति। न्यायपलब्धेर्थे लिंगमप्याह। गर्गादिष्विति। आउः शंसिति। आउसहनिर्देशा॰

स्तुसर्वशंसेर्न ग्रहणमिति भावः। कथमिति। लोके कथमिति प्रश्नः। सरूपबाधेनैवेति। अत एव क्विकिनोर्विधानं चरिता

र्थमिति भावः। न च लिङ्दुद्दनिर्देशाड्डावकर्मणोरयेनोस्यानां। उत्सन्नयोः कार्यानिर्देशादुत्पत्तिश्च कर्तरि कृदित्येकवाक्य

नयाकर्तर्येव वर्तमान इत्यधिकारेण भूतकालेपि नातिदिश्यत इति दिक्। बाहुलकं त्विति। नाभ्यामन्यत्रोणादय इत्यु

केरुणादिक्किपः कर्मण्यपि सत्त्वमित्यप्यगतिकागतिरिबोध्यम्। निर्देशादिति। शौचार्हस्त्रोमणिरिति भाष्यप्रयोगाच्चेत्स्य

पि बोध्यम्। एतच्च वृत्त्यनुसारेण। दृशेर्निशम्पानिर्देशो दंशसंजेनिनलोप इत्यनिदितामिति सूत्रे भाष्ये। दशना इत्यौणादिकः
